श्रीगणपतिर्विजयते   यस्य त्क्वा रूपमाद्यं प्रभवति जगतोनेकधानुग्रहाय प्रक्षीणक्लेश
राशिर्विषमविषधरोनेकवक्त्रः सुभोगी सर्वज्ञानप्रसूतिर्भुजगपरिकरः प्रीतये यस्य
नित्यं देवोहीशः सवोऽव्यात्सितविमलतनुर्योगदो योगयुक्तः ॥१॥ अथ योगानुशासनम्
अथेत्ययमधिकारार्थः योगानुशासनं शास्त्रमधिकृतं वेदितव्यम् योगः समाधिः स
च सार्वभौमश्चित्तस्य धर्मः क्षिप्तं मूढं विक्षिप्तमेकाग्रं निरुद्धमिति चित्तभूमयः
तत्र विक्षिप्ते चेतसि विक्षेपोपसर्जनीभूतः समाधिर्न योगपक्षे वर्तते। यस्त्वेकाग्रे
चेतसि सद्भूतमर्थं प्रद्योतयति क्षिणोति च क्लेशान्कर्मबन्धनानि श्लथयति निरोध
मभिमुखं करोति स संप्रज्ञातो योग इत्याख्यायते ॥ स च वितर्कानुगतो विचारानुगत
आनन्दानुगतोऽस्मितानुगत इति तदुपरिष्टात्प्रवेदयिष्यामः सर्ववृत्तिनिरोधे त्वसंप्रज्ञा
तस्समाधिः तस्य लक्षणाभिधित्सयाइदं सूत्रं प्रववृते योगश्चित्तवृत्तिनिरोधः॥२

पा॰यो॰ सर्वशब्दाग्रहणात्संप्रज्ञातोपि योग इत्याख्यायते चित्तं हि प्रख्या प्रवृत्ति स्थितिशीलत्वा
१ त्त्रिगुणम् प्रख्यारूपं हि चित्तसत्वं रजस्तमोभ्यां संसृष्टमैश्वर्यविषयप्रियं भ
वति तदेव तमसानुविद्धमधर्म्माज्ञानावैराग्यानैश्वर्योपगं भवति तदेव प्रक्षी
णमोहावरणं सर्वतः प्रद्योतमानमनुविद्धं रजोमात्रया धर्मज्ञानवैराग्यैश्वर्यो
पगं भवति तदेव रजोलेशमलापेतं स्वरूपप्रतिष्ठं सत्वपुरुषान्यताख्यातिमा
त्रं धर्ममेघध्यानोपगं भवति। तत्परं प्रसंख्यानमित्याचक्षते ध्यायिनः चिति
शक्तिरपरिणामिन्यप्रतिसंक्रमा दर्शितविषया शुद्धा चानन्ता च सत्वगुणात्मि
का चेयमतो विपरीता विवेकख्यातिरिति अतस्तस्यां विरक्तं चित्तं तामपि ख्या
तिं निरुणद्धि तदवस्थं संस्कारोपगं भवति स तु निर्बीजसमाधिः न तत्र रामः
किंचित्संप्रज्ञायत इति संप्रज्ञातो द्विविधः स योगश्चित्तवृत्तिनिरोधः ॥ १

तदवस्थे चेतसि विषयाभावाद्बुद्धिबोधात्मा पुरुषः किंस्वभाव इति तदा द्रष्टुः स्व
रूपेवस्थानम् स्वरूपप्रतिष्ठा तदानीं चितिर्यथा कैवल्ये व्युत्थानचित्ते तु सति तथा
पि भवतीयन्न तथा कथं तर्हि दर्शितविषयत्वात् वृत्तिसारूप्यमितरत्र ४
व्युत्थाने याश्चित्तवृत्तयस्तदविशिष्टवृत्तिः पुरुषः तथा च सूत्रम् एकमेव दर्श
नं ख्यातिरेव दर्शनम् चित्तमयस्कान्तमणिकल्पं सन्निधिमात्रोपकारि दृश्य
त्वेन स्वं भवति पुरुषस्य स्वामिनः तस्माच्चित्तवृत्तिबोधे पुरुषस्यानादिः संब
न्धो हेतुः ताः पुनर्निरोद्धव्या बहुत्वे सति चित्तस्य ४ वृत्तयः पंचतय्यः क्लिष्टाक्
लिष्टाः ॥ क्लेशहेतुकाः कर्माशयप्रचये क्षेत्रीभूताः क्लिष्टाः ख्यातिविषयाः गुणा
धिकारविरोधिन्योऽक्लिष्टाः क्लिष्टप्रवाहपतिता अप्यक्लिष्टाः । क्लिष्टच्छिद्रेष्वपि
ता अप्यक्लिष्टा भवन्ति । अक्लिष्टच्छिद्रेषु क्लिष्टा इति । तथाजातीयकाः संस्कारा
वृत्तिभिरेव क्रियन्ते । संस्कारैश्च वृत्तय इति एवं च वृत्तिसंस्कारचक्रमनिशमा

पा॰यो॰ २ मावर्त्तते । तदेवंभूतं चित्तमवसिताधिकारमात्मकल्पेन व्यवतिष्ठते । प्रलयं वा
गच्छतीति । ताः क्लिष्टाश्चाक्लिष्टाश्च पञ्चधा वृत्तयः । प्रमाणविपर्ययविकल्प
निद्रास्मृतयः ॥ तत्र प्रत्यक्षानुमानागमाः प्रमाणानि ॥ इन्द्रियप्रणालि
कया चित्तस्य बाह्यवस्तूपरागात्तद्विषया सामान्यविशेषात्मनोऽर्थस्य वि
शेषावधारणप्रधाना वृत्तिः प्रत्यक्षं प्रमाणम् ॥ फलमविशिष्टः पौरुषेयः
चित्तवृत्तिबोधः बुद्धेः प्रतिसंवेदी पुरुष इत्युपरिष्टादुपपादयिष्यामः ॥ अनु
मेयस्य तुल्यजातीयेष्वनुवृत्तो भिन्नजातीयेभ्यो व्यावृत्तः संबन्धो यः तद्विषया सामा
न्यावधारणप्रधाना वृत्तिरनुमानम् । यथा देशान्तरप्राप्तेर्गतिमच्चन्द्रतारकं वा२२
चैत्रवत् ॥ विन्ध्यश्चाप्राप्तेरगतिः । आप्तेन दृष्टोऽनुमितोऽर्थः परत्र स्वबोध रामः
संक्रान्तये शब्देनोपदिश्यते शब्दात्तदर्थविषया वृत्तिः श्रोतुरागमः । यस्या २

श्रद्धेयार्थो वक्तान दृष्टानुमितार्थः सन्नागमः प्लवते ॥ मूलवक्तरि तु दृष्टानुमिता
र्थे निर्विप्लवः स्यात् ।८ विपर्ययो मिथ्याज्ञानमतद्रूपप्रतिष्ठम् । सकस्मान्न प्र
माणं । यतः प्रमाणेन बाध्यते । भूतार्थविषयत्वात्प्रमाणस्य । तत्र प्रमाणेन बा
धनमप्रमाणस्य दृष्टम् । तद्यथा । द्विचन्द्रदर्शनं सद्विषयेणैकचन्द्रदर्शनेन बाध्यत
इति । सेयं पञ्चपर्वा भवत्यविद्या अविद्यास्मितारागद्वेषाभिनिवेशाः क्लेशा इति
एतदावत्त संज्ञाभिस्तमो मोहो महामोहः तामिस्रो ह्यन्धतमिस्र इति ॥ एते चित्तमलप्रसङ्गेना
भिधास्यन्ते ।९ शब्दज्ञानानुपाती वस्तुशून्यो विकल्पः । सन्नप्रमाणोपारोहीन विपर्य
योपारोही ॥ वस्तुशून्यत्वेऽपि शब्दज्ञानमाहात्म्यनिबन्धनो व्यवहारो दृश्यते । तद्यथा चै
तन्यं पुरुषस्य स्वरूपमिति । यदा चितिरेव पुरुषस्तदा किमत्र केन व्यपदिश्यते । भवति च
व्यपदेशो वृत्तिः । यथा चैत्रस्य गौरिति । तथा प्रतिषिद्धवस्तुधर्मा निष्क्रियः पुरुषः । ति
स्या ४ ष्ठति वाणः स्थास्यति स्थित इति । गतिनिवृत्तौ धात्वर्थमात्रं गम्यते । तथानुत्पत्तिधर्मा

पा॰यो॰ ३ पुरुषइति उत्पत्तिधर्मस्याभावमात्रमवगम्यते नपुरुषान्वयीधर्मः। तस्माद्विकल्पि
तः सधर्मस्तेनचास्तिव्यवहार इति।९।अभावप्रत्ययालम्बनावृत्तिर्निद्रा॥साच
संप्रबोधे प्रत्यवमर्शात्प्रत्ययविशेषः। कथं सुखमहमस्वाप्सं। प्रसन्नं मे मनः। प्रज्ञां मे
विशारदीकरोति। दुःखमहमस्वाप्सं स्त्यानं मे मनो भ्रमत्यनवस्थितम्। गाढं मूढो
ऽहमस्वाप्सं गुरूणि गात्राणि क्लान्तं मे चित्तं अलसं मुषितमिव तिष्ठतीति॥ सख
ल्वयं प्रबुद्धस्य प्रत्यवमर्शो न स्यादसति प्रत्ययानुभवे तदाश्रयाः स्मृतयश्च तद्वि
षया न स्युः॥ तस्मात्प्रत्ययविशेषो निद्रा साच समाधावितरप्रत्ययवन्निरोद्धव्येति।१०।अनु
भूतविषयासंप्रमोषः स्मृतिः॥ किं प्रत्ययस्य चित्तं स्मरति आहोस्वित् विषयस्येति॥
ग्राह्योपरक्तः प्रत्ययो ग्राह्यग्रहणोभयाकारनिर्भासः तथाजातीयकं संस्कारमार
भते। ससंस्कारः स्वव्यञ्जकाञ्जनस्तदाकारामेव ग्राह्यग्रहणोभयात्मिकां स्मृतिं जनयति राम: ३

तत्र ग्रहणाकारपूर्वा बुद्धिः ग्राह्याकारपूर्वा स्मृतिः सा च द्वयी भावितस्मर्तव्या
अभावितस्मर्तव्या च स्वप्ने भावितस्मर्तव्या जाग्रत्समये त्वभावितस्मर्तव्येति सर्वा
श्चैताः स्मृतयः प्रमाणविपर्ययविकल्पनिद्रास्मृतीनामनुभवात्प्रभवन्ति।
सर्वाश्चैता वृत्तयः सुखदुःखमोहात्मिकाः सुखदुःखमोहाश्च क्लेशेषु व्या
ख्येयाः सुखानुशयी रागः दुःखानुशयी द्वेषः मोहः पुनरविद्येति। एताः
सर्वा वृत्तयो निरोद्धव्याः। आसां निरोधे संप्रज्ञातो वा समाधिर्भवत्यसंप्रज्ञा
तो वेति। अथासां निरोधे क उपाय इति।१२। अभ्यासवैराग्याभ्यां तन्निरोधः
चित्तनदी नामोभयतो वाहिनी। वहति कल्याणाय वहति पापाय च या तु कैवल्य
प्राग्भारा विवेकविषयनिम्ना सा कल्याणवहा। संसारप्राग्भारा विवेकवि
षयनिम्ना पापवहा तत्र वैराग्येन विषयस्रोतः खिलीक्रियते। विवेकदर्शना

विवेक

पा॰ यो॰ ४ भ्यासेन कल्याण स्रोत उद्घाट्यते इत्युभयाधीनश्चित्तवृत्तिनिरोधः ॥१२॥ तत्र
स्थितौ यत्नोऽभ्यासः ॥ चित्तस्यावृत्तिकस्य प्रशान्तवाहिता स्थितिः ॥ तदर्थः
प्रयत्नो वीर्यमुत्साहः तत्सम्पिपादयिषया तत्साधनानुष्ठानमभ्यासः ॥१३॥
4 सतु दीर्घकालनैरन्तर्य सत्कारासेवितो दृढभूमिः ॥१४॥ दीर्घकालासेवितो निर
न्तरासेवितः सत्कारासेवितः तपसा ब्रह्मचर्येण विद्यया श्रद्धया च सम्पादित
सत्कारवान्दृढभूमिर्भवति। व्युत्थानसंस्काररागद्रागित्येवानभिभूतविषय इत्यर्थः १४
दृष्टानुश्रविकविषयवितृष्णस्य वशीकारसंज्ञा वैराग्यम् ॥ स्त्रियोऽन्नपानमैश्वर्य
मिति दृष्टविषये वितृष्णस्य। स्वर्गवैदेह्यप्रकृतिलयत्वप्राप्तावानुश्रविकवि
षयवितृष्णस्य दिव्यादिव्यविषयसंप्रयोगेऽपि चित्तस्य विषयदोषदर्शिनः प्रसं राम: ४
ख्यानबलादनाभोगात्मिका हेयोपादेयशून्या वशीकारसंज्ञा वैराग्यम् १५

तत्परं पुरुषख्यातेर्गुणवैतृष्ण्यम् ॥ दृष्टानुश्रविकविषयदोषदर्शी विरक्तः
पुरुषदर्शनाभ्यासात् तच्छुद्धिप्रविवेकाप्यायितबुद्धिर्गुणेभ्यो व्यक्ताव्यक्त
धर्मकेभ्यो विरक्त इति तद्द्वयं वैराग्यम् । तत्र यदुत्तरं तज्ज्ञानप्रसादमात्रम् ॥
यस्योदये प्रत्युदितख्यातिरेवं मन्यते । प्राप्तं प्रापणीयं क्षीणाः क्षेतव्याः क्लेशाः
छिन्नः श्लिष्टपर्वा भवसंक्रमो यस्याविच्छेदात् जनित्वा म्रियते मृत्वा च जायत
इति । ज्ञानस्यैव परा काष्ठा वैराग्यमेतस्यैव हि नान्तरीयकं कैवल्यमिति ॥ अथोपाय
द्वयेन निरुद्धचित्तवृत्तेः कथमुच्यते सम्प्रज्ञातस्समाधिरिति ॥ वितर्कविचारा
नन्दास्मितारूपानुगमात्संप्रज्ञातः ॥ वितर्कश्चित्तस्यालम्बने स्थूल आभोगः सूक्ष्मो
विचारः आनन्दो ह्लादः एकात्मिका संविदस्मिता । तत्र प्रथमश्चतुष्टयानुगतः ॥
समाधिस्सवितर्कः द्वितीयो वितर्कविकलः सविचारः तृतीयो विचारविक

पा॰ यो॰ ५ लः सानन्दः चतुर्थस्तदविकलोऽस्मितामात्रइति सर्वएते सालम्बनाः समाधयः॥
अथासंप्रज्ञातस्समाधिः किमुपायः किंस्वभावइति।१७।। विरामप्रत्ययाभ्या
सपूर्वस्संस्कारशेषोऽन्यः।। चित्तसर्ववृत्तिप्रत्यस्तमये संस्कारशेषानिरोध
श्चित्तस्य समाधिरसंप्रज्ञातः तस्य परं वैराग्यमुपायः। सालम्बनोह्यभ्यासस्त
त्साधनाय नकल्पतइति। विरामप्रत्ययो निर्वस्तुकआलम्बनी क्रियते। सचस
र्वार्थशून्यः तदभ्यासपूर्वकं चित्तं निरालम्बनमभावप्राप्तमिव भवत्येषनिर्बीजस
माधिरसंप्रज्ञातः। सखल्वयं द्विविधः उपायप्रत्ययोभवप्रत्ययश्च तत्रोपायप्रत्ययो
योगिनांभवति भवप्रत्ययोविदेहप्रकृतिलयानाम्।। विदेहानांदेवानांभवप्र
त्ययः तेहिस्वसंस्कारमात्रोपगतेन चित्तेन कैवल्यपदमिवानुभवन्तः स्वसंस्कार रामः ५
विपाकं तथाजातीयकमतिवाहयन्ति।१९/ तथा प्रकृतिलयास्साधिकारेचे

तस्मिं प्रकृतिलीने कैवल्यपदमिवानुभवन्ति। यावन्न पुनरावर्तते ऽधिकार
वशाच्चित्तमिति १९ श्रद्धावीर्यस्मृतिसमाधिप्रज्ञापूर्वक इतरेषाम् ॥ उपा
यप्रत्ययो योगिनां भवति श्रद्धा चेतसः संप्रसादः। सा हि जननीव कल्याणी
योगिनं पाति तस्य हि श्रद्दधानस्य विवेकार्थिनो वीर्यमुपजायते। समुपजा
तवीर्यस्य स्मृतिरुपतिष्ठते स्मृत्युपस्थाने च चित्तमनाकुलं समाधीयते ॥
समाहितचित्तस्य प्रज्ञाविवेक उपावर्तते। येन यथार्थं वस्तु जानाति। तदभ्यासा
त्तद्विषयाच्च वैराग्यादसंप्रज्ञातः समाधिर्भवति। ते खलु नव योगिनो मृदुमध्या
धिमात्रोपाया भवन्ति तद्यथा मृदूपायो मध्योपायो ऽधिमात्रोपाय इति तत्र मृदूपा
यस्त्रिविधः मृदुसंवेगः मध्यसंवेगस्तीव्रसंवेग इति। तथा मध्योपायस्तथाधिमात्रो
पाय इति तत्राधिमात्रोपायानां तीव्रसंवेगानामासन्नः। समाधिलाभः समाधि

पा॰यो॰ ६

6

फलंचभवतीति।२१। मृदुमध्याधिमात्रत्वात्ततोपि विशेषः॥ मृदुतीव्रोमध्य
तीव्राऽधिमात्रतीव्रइति ततोपि विशेषः। तद्विशेषादपि मृदुतीव्रसंवेगस्या
सन्नः। ततोपि मध्यतीव्रसंवेगस्यासन्नतरः। ततोप्यधिमात्रतीव्रसम्वेगस्यास
न्नतमः समाधिलाभस्समाधिफलञ्चभवति॥ किमेतस्मादेवासन्नतरः
समाधिर्भवति।२२।। अथास्यलाभे भवत्यन्योपि कश्चिदुपायोनवेति॥ ई
श्वरप्रणिधानाद्वा।२३।। प्रणिधानाभक्तिः विशेषादावर्जितईश्वरस्तमनुगृ
ह्णातीति अभिध्यानमात्रेण तदभिध्यानादपियोगिनश्चासन्नतमस्समाधिला
भः समाधिफलञ्चभवतीति॥ अथप्रधानपुरुषव्यतिरिक्तः कोयमीश्वरोना
मेति॥ क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेषईश्वरः।२४।। राम॰ ६
अविद्यादयः क्लेशाः। कुशलाकुशलानि कर्माणि तत्फलंविपाकस्त

तदनुगुणा वासना आशयाः ते च मनसि वर्तमानाः पुरुषे व्यपदिश्यन्ते । स हि
तत्फलस्य भोक्तेति । यथा जयः पराजयो वा योद्धृषु वर्तमानः स्वामिन्युपदिश्यते ।
यो ह्यनेन भोगेनापरामृष्टः स पुरुषविशेष ईश्वरः ।। कैवल्यं प्राप्तास्तर्हि सन्ति च
बहवः केवलिनः ते हि त्रीणि बन्धनानि छित्वा कैवल्यं प्राप्ताः ।। ईश्वरस्य तत्संबन्धो
न भूतो न भावी ।। यथा मुक्तस्य पूर्वा बन्धकोटिः प्रज्ञायते नैवमीश्वरस्य यथा वा
प्रकृतिलीनस्योत्तरा संबन्धकोटिः संभाव्यते । नैवमीश्वरस्य ।। स तु सदैव मुक्तः स
दैवईश्वर इति ।। योऽसौ प्रकृष्टसत्वोपादानादीश्वरस्य शाश्वतिक उत्कर्षः स किं
सनिमित्त आहोस्विन्निर्निमित्त इति । तस्य शास्त्रं निमित्तम् ।। शास्त्रं पुनः किंनि
मित्तम् ।। प्रकृष्टसत्वनिमित्तं एतयोः शास्त्रोत्कर्षयोरीश्वरसत्वे वर्तमानयो
रनादिसंबन्धः एतस्मादेतद्भवति । सदैवेश्वरः सदैव मुक्त इति । तस्यैश्वर्यं सा
म्यातिशयविनिर्मुक्तम् । न तावदैश्वर्यान्तरेण तदतिशय्यते । यदेवातिशयि

पा॰यो॰

तदेवतत्स्यात् । तस्माद्यत्रकाष्ठाप्राप्तिरैश्वर्यस्य सईश्वरइति । नचतत्समानमैश्वर्यम
स्ति ।। कस्मात् द्वयोस्तुल्ययोरेकस्मिन् युगपत्कामितेर्थे नवमिदमस्तु पुराणमिद
मस्त्विति एकस्य सिद्धावितरस्य प्राकाम्यविघातादूनत्वंप्रसक्तम् द्वयोश्चतुल्ययो
र्युगपत्कामितार्थप्राप्तिर्नास्ति । अर्थस्यविरुद्धत्वात् । तस्माद्यस्यसाम्यातिशयवि
र्मुक्तमैश्वर्यं सईश्वरः । सचपुरुषविशेषइति । २४ । किञ्च । तत्रनिरतिशयंसर्व
ज्ञत्वंबीजम् ।। यदिदमतीतानागतप्रत्युत्पन्नप्रत्येकसमुच्चयातीन्द्रियग्रहणमल्पं
बह्विति सर्वज्ञबीजमेतत् विवर्धमानं यत्रनिरतिशयं ससर्वज्ञः ।। अस्तिकाष्ठा
प्राप्तिः सर्वज्ञबीजस्य सातिशयत्वात् परिमाणवदिति ।। यत्रकाष्ठाप्राप्तिर्ज्ञानस्य
ससर्वज्ञः सचपुरुषविशेषइति । सामान्यमात्रोपसंहारेकृतेनोपक्षयमनुमानं
नविशेषप्रतिपत्तौसमर्थमिति तस्यसंज्ञादिविशेषप्रतिपत्तिरागमतः पर्यन्वे

रामः

ष्या। तस्यात्मानुग्रहाभावेऽपि भूतानुग्रहः प्रयोजनम्॥ ज्ञानधर्मोपदेशेन कल्पप्रल
यमहाप्रलयेषु संसारिणः पुरुषानुद्धरिष्यामीति तथा चोक्तम् आदिविद्वान्निर्मा
ण चित्तमधिष्ठाय कारुण्याद्भगवान् परमर्षिरासुरये जिज्ञासमानाय प्रोवाच
चेति। स एष पूर्वेषामपि गुरुः कालेनानवच्छेदात्॥ पूर्वे हि गुरवः कालेनावच्छिद्यं
ते। यत्रावच्छेदार्थेन कालो नोपावर्तते स एष पूर्वेषामपि गुरुः॥ यथास्य सर्वस्यादौ
प्रकर्षगत्या सिद्धस्तथातिक्रान्तसर्गादिष्वपि प्रत्येतव्यः॥ तस्य वाचकः प्रणवः॥ वा
च्य ईश्वरः प्रणवस्य। किमस्य संकेतकृतं वाच्यवाचकत्वम्॥ अथ प्रदीपप्रकाशवद
स्थितमिति। स्थितोऽस्य वाच्यस्य वाचकेन सह सम्बन्धः। संकेतस्तु ईश्वरस्य स्थितमेवार्थ
द्यो र्थ मभिनयति। यथावस्थितः पितापुत्रयोः सम्बन्धः संकेतेनाव[illegible]ते। अयमस्य पिता अय
मस्य पुत्र इति। सर्गान्तरेष्वपि वाच्यवाचकशक्त्यपेक्षस्तथैव संकेतः क्रियते। संप्रति

पा॰ यो॰ पत्ति नित्यतया नित्यः शब्दार्थसम्बन्धइत्यागमिना प्रतिजानीते ।। विज्ञानवाच्यवाच
८ कत्वस्य योगिनः ।। तज्जपस्तदर्थभावनम् ।। प्रणवस्य जपः प्रणवाभिधेयस्य चेश्वरस्य
भावनम् ।। तदस्य योगिनः प्रणवं जपतः प्रणवार्थं च भावयतः चित्तमेकाग्रं संप
पा॰ यो॰ ४ द्यते ।। तथा चोक्तम् ।। स्वाध्यायाद्योगमासीत योगात्स्वाध्यायमामनेत् ।। स्वाध्याययो
गसंपत्त्या परमात्मा प्रकाशत इति ।। किं चास्य भवति ।। ततः प्रत्यक्चेतनाधिगमो
8 ऽप्यन्तरायाभावश्च ।। ये तावदन्तराया व्याधिप्रभृतयः ते तावदीश्वरप्रणिधानान्न
भवन्ति ।। स्वरूपदर्शनमप्यस्य भवति ।। यथैवेश्वरः पुरुषः शुद्धः प्रसन्नः केवलोऽ
नुपसर्गः ।। तथायमपि बुद्धेः प्रतिसंवेदी यः पुरुष इत्येवमधिगच्छति ।। अथ केऽन्तरायाः
ये चित्तस्य विक्षेपाः के पुनस्ते कियन्तो वेति ।। व्याधिस्त्यानसंशयप्रमादालस्याविरति रामः
भ्रांतिदर्शनालब्धभूमिकत्वानवस्थितत्वानि चित्तविक्षेपास्तेऽन्तरायाः ।। नवान्तरा ८

व्याधि

याश्चित्तस्यविक्षेपाः। सहैतेचित्तवृत्तिभिर्भवन्त्येतेषामभावेनभवन्ति पूर्वोक्ता
श्चित्तवृत्तयः।। तत्रव्याधिर्धातुरसकरणवैषम्यम्।। स्त्यानमकर्मण्यताचित्तस्य। सं
शयउभयकोटिस्पृग्विज्ञानंस्यादिदमेवंनैवंस्यादिति।। प्रमादःसमाधिसाध
नानामभावनम्।। आलस्यंकायचित्तगुरुत्वादप्रवृत्तिः।। अविरतिश्चित्तस्य
विषयसंप्रयोगात्मागर्द्धः।। भ्रांतिर्विपर्ययज्ञानम्।। अलब्धभूमिकत्वंसमाधि
भूमेरलाभः।। अनवस्थितत्वंयल्लब्धायांभूमौचित्तस्याप्रतिष्ठा।। समाधिप्र
तिलंभेपिनतदवस्थितंस्यादिति।। एतेचित्तविक्षेपानवयोगमलाःयोगप्रति
पक्षायोगान्तरायाइत्यभिधीयन्ते।।३०।। दुःखदौर्मनस्यांगमेजयत्वश्वासप्रश्वा
साविक्षेपसहभुवः।। दुःखमाध्यात्मिकम्।। आधिभौतिकंआधिदैविकञ्च।। येना
भिहताःप्राणिनस्तदपघातायप्रयतन्ते तत्दुःखम्।। दौर्मनस्यमिच्छाभिघाताचेत

पा॰यो॰ चेतसंक्षोभः ।। यदंगान्येजयति कंपयति तदंगमेजयत्वम् ।। प्राणोयद्बाह्यंवायु
९ माचामति सश्वासः ।। यत्कौष्ठ्यंवायुं निस्सारयति स प्रश्वासः । एते विक्षेपस
हभुवो विक्षिप्तचित्तस्यैते भवन्ति समाहितचित्तस्यैते न भवन्ति ।। अथैते विक्षेपाः
समाधिप्रतिपक्षाः ताभ्यामेवाभ्यासवैराग्याभ्यां निरोद्धव्याः । तत्राभ्यासस्य विषय
मुपसंहरन्निदमाह ।। तत्प्रतिषेधार्थमेकतत्त्वाभ्यासः ।। विक्षेपप्रतिषेधार्थमेकत
सू॰ त्त्वावलंबनं चित्तमभ्यसेत् ।। यस्य तु प्रत्यर्थनियतं प्रत्ययमात्रं क्षणिकं च चित्तं तस्य
सर्वमेव चित्तमेकाग्रं नास्त्येव ।। विक्षिप्तं यदि पुनरिदं सर्वतः प्रत्याहृत्य एकस्मि
न्नर्थे समाधीयते तदा भवत्येकाग्रमित्यतो न प्रत्यर्थनियतं चित्तम् ।। योपि सदृश
प्रत्ययप्रवाहेण चित्तमेकाग्रं मन्यते तस्यैकाग्रता यदि प्रवाहचित्तस्य धर्मस्तदैकं रामः
नास्ति प्रवाहचित्तं क्षणिकत्वात् ।। अथ प्रवाहांशस्यैव प्रत्ययस्य धर्मः स सर्वः सदृश ९

प्रत्ययप्रवाहोवा ऽविसदृशप्रत्ययप्रवाहोवा। प्रत्यर्थनियतत्वात्॥ एकाग्रमेवेति वि
क्षिप्तचित्तानुपपत्तिः॥ तस्मादेकमनेकार्थमवस्थितं चित्तमिति॥ यदि च चित्ते
नैकेनाननन्विताः स्वभावभिन्नाः प्रत्यया जायेरन्॥ अथ कथमन्यप्रत्ययदृष्टस्यान्यः
स्मर्ता भवेत्। अन्यप्रत्ययोपचितस्य च कर्माशयस्यान्यः प्रत्यय उपभोक्ता भवेत्॥ कथ
ञ्चित्समाधीयमानमप्येतद्गोमयपायसीयन्यायमाक्षिपति॥ किञ्च॥ स्वात्मानुभवा
पह्नवश्चित्तस्यान्यत्वे प्राप्नोति॥ कथं यदहमद्राक्षं तत्स्पृशामि। यच्चास्प्राक्षं तत्पश्यामी
ति। अहमिति प्रत्ययः॥ सर्वस्य प्रत्ययस्य भेदे सति प्रत्ययिन्यभेदेनोपस्थितः॥ एकप्रत्य
यविषयोऽयमभेदात्माऽहमिति प्रत्ययः कथमत्यन्तभिन्नेषु चित्तेषु वर्तमानः॥
सामान्यमेकं प्रत्ययिनमाश्रयेत्॥ स्वानुभवग्राह्यश्चायमभेदात्माऽहमिति प्रत्य
यः॥ न च प्रत्यक्षस्य माहात्म्यं प्रमाणान्तरेणाभिभूयते॥ प्रमाणान्तरं च प्रत्यक्षबलेनै

व्यवहारं लभते ॥ तस्मादेकमनेकार्थमवस्थितं चित्तम् ॥ यस्येदं शास्त्रेण परिकर्म निर्दि
पा॰ यो॰ श्यते तत्कथम् ॥ मैत्रीकरुणामुदितोपेक्षाणां सुखदुःखपुण्यापुण्यविषयाणां भाव
१० नातश्चित्तप्रसादनम् ॥ तत्र सर्वप्राणिषु सुखसंभोगापन्नेषु मैत्रीं भावयेत् ॥ दुःखि
तेषु करुणाम् ॥ पुण्यात्मकेषु मुदिताम् ॥ अपुण्यशीलेषु उपेक्षाम् ॥ एवमस्य भा
10 वयतः शुक्लो धर्म उपजायते ततश्चित्तं प्रसीदति प्रसन्नमेकाग्रं स्थितिपदं लभते
प्रच्छर्दनविधारणाभ्यां वा प्राणस्य ॥ कौष्ठ्यस्य वायोर्नासिकापुटाभ्यां प्रयत्नवि
शेषाद्वमनं प्रच्छर्दनम् ॥ विधारणं प्राणायामः ॥ ताभ्यां वा मनसः स्थितिं सं
पादयेत् ॥ विषयवती वा प्रवृत्तिरुत्पन्ना मनसः स्थितिनिबन्धनी ॥ नासिकाग्रे धा
रयतोऽस्य या दिव्यगन्धसंवित्सा गन्धप्रवृत्तिः ॥ जिह्वाग्रे रससंवित् ॥ तालुनि रामः
रूपसंवित् ॥ जिह्वामध्ये स्पर्शसंवित् ॥ जिह्वामूले शब्दसंवित् ॥ इत्येताः प्रवृत्तय १०

उत्पन्नाः चित्तं स्थितौ निबध्नन्ति । संशयं विधमन्ति समाधि प्रज्ञायां च द्वारीभव
न्तीति ॥ एतेन चन्द्रादित्य ग्रहमणि प्रदीपरश्म्यादिषु प्रवृत्तिरुत्पन्ना विषयवत्ये
व वेदितव्या ॥ यद्यपि हि तत्तच्छास्त्रानुमानाचार्योपदेशैरवगतमर्थतत्त्वं सद्भूतमेव
भवति एतेषां यथाभूतार्थ प्रतिपादनसामर्थ्यात् तथापि यावदेकदेशोपि कश्चिन्न
स्वकरणसंवेद्यो भवति तावत्सर्वं परोक्षमिव अपवर्गादिषु सूक्ष्मेष्वर्थेषु न दृढां बु
द्धिमुत्पादयति ॥ तस्माच्छास्त्रानुमानाचार्योपदेशोपोद्बलनार्थमेवावश्यं कश्चिद
द्विशेषः प्रत्यक्षीकर्तव्यः ॥ तत्र तदुपदिष्टार्थैकदेशप्रत्यक्षत्वे सति सर्वं सूक्ष्मं
विषयमपि अपवर्गात् श्रद्धीयते ॥ एतदर्थमेवेदं चित्तपरिकर्म निर्दिश्यते ॥ अनि
यतासु वृत्तिषु तद्विषयायां वशीकारसंज्ञायां उपजातायां समर्थं स्यात् ॥ तस्य तदा
र्थस्य प्रत्यक्षीकरणायेति ॥ तथा च सति श्रद्धावीर्यस्मृति समाधयोऽस्याप्रतिब

न्धेन भविष्यंति इति। विशोका वा ज्योतिष्मती ॥ प्रवृत्तिरुत्पन्ना मनसः स्थिति
पा॰ यो॰ निबन्धनीत्यनुवर्तते ॥ हृदयपुण्डरीके धारयतो या बुद्धि संवित् ॥ बुद्धिसत्वं हि
११ प्रभास्वरमाकाशकल्पं तत्र स्थितिवैशारद्यात् प्रवृत्तिः ॥ सूर्येन्दुग्रहमणि प्रभा
रूपाकारेण विकल्पते ॥ तथास्मितायां समापन्नं चित्तं निस्तरङ्ग महोदधिकल्पं शा
न्तमनन्तमस्मितामात्रं भवति ॥ यत्रेदमुक्तम् ॥ तमणुमात्रमात्मानमनुविद्यास्मी
ति ॥ एवं तावत्संप्रजानीत इत्येषा द्वयी विशोका विषयवती अस्मितामात्रा च प्र
वृत्तिर्ज्योतिष्मतीत्युच्यते ॥ यया योगिनश्चित्तं स्थितिपदं लभत इति ॥ स्वप्न
निद्राज्ञानालंबनं वा ॥ वीतरागविषयं वा चित्तम् ॥ वीतरागचित्तालम्बनोप
रक्तं वा योगिनश्चित्तं स्थितिपदं लभते ॥ स्वप्ननिद्राज्ञानालंबनं वा ॥ स्वप्नज्ञानालं राम:
बनं निद्राज्ञानालंबनं वा तदाकारं योगिनश्चित्तं स्थितिपदं लभत इति ॥ यथा ११

ऽभिमतध्यानाद्वा ।। यदेवाभिमतं तदेव ध्यायेत ।। तत्र लब्धस्थितिकमन्यत्रापि
स्थितिपदंलभतइति ।। हरिहरादिरूपम् ।। परमाणुपरममहत्वांऽतोस्यवशीका
रः ।। सूक्ष्मेनिविशमानस्य परमाण्वन्तं स्थितिपदंलभतइति ।। स्थूलेनिविशमान
स्य परममहत्त्वांतं स्थितिपदं चित्तस्य ।। एवंतामुभयींकोटिमनुधावतो योऽस्या
प्रतिघातः सपरोवशीकारः ।। तद्वशीकारात्परिपूर्णं योगिनश्चित्तंनपुनरभ्या
सकृतंपरिकर्मापेक्षतइति ।। अथलब्धस्थितिकस्यचेतसः किंस्वरूपा किंपु
विषया वा समापत्तिरिति तदुच्यते ।। क्षीणवृत्तेरभिजातस्येवमणेर्ग्रहीतृग्रहण
ग्राह्येषुतत्स्थतदञ्जनता समापत्तिः ।। क्षीणवृत्तेरिति प्रत्यस्तमितप्रत्ययस्येत्यर्थः
अभिजातस्येवमणेरितिदृष्टान्तोपादानम् ।। यथास्फटिक उपाश्रयभेदात्
तद्रूपोपरक्तउपाश्रयरूपाकारेणनिर्भासते ।। तथाग्राह्यौकामोपलंबनं

पा॰ यो॰
१२

चित्तं ग्राह्यसमापन्नं ग्राह्यरूपाकारेण निर्भासते ।। तथाभूतसूक्ष्मोपरक्तं भूतसू
क्ष्मसमापन्नं भूतसूक्ष्मस्वरूपाभासम् ।। तथा स्थूलालंबनोपरक्तं स्थूलरूपापन्नं
स्थूलरूपाभासं भवति ।। तथा विश्वभेदोपरक्तं विश्वभेदसमापन्नं विश्वरूपा
भासं भवति ।। तथा ग्रहणेष्वपीन्द्रियेषु द्रष्टव्यम् ।। ग्रहणालंबनोपरक्तं ग्रहण
रूपापन्नं ग्रहणरूपाकारेण निर्भासते ।। तथा गृहीतपुरुषालंबनोपरक्तं पुरुष
समापन्नं गृहीतपुरुषस्वरूपाकारेण निर्भासते ।। तथा मुक्तपुरुषालंबनोपरक्तं
मुक्तपुरुषसमापन्नं मुक्तपुरुषस्वरूपाकारेण निर्भासते ।। तदेवमभिजातमणि
कल्पस्य चेतसो गृहीतृग्रहणग्राह्येषु पुरुषेन्द्रियभूतेषु या तत्स्थतदञ्जनता तेषु स्थि
तस्य तदाकारापत्तिः समापत्तिरित्युच्यते ।। तत्र शब्दार्थज्ञानविकल्पैः संकीर्णा सवित
र्का समापत्तिः ।। तद्यथा गौरिति शब्दो गौरित्यर्थो गौरिति ज्ञानमित्यविभागे

रामः
१२

नचविभक्तानामपिग्रहणं दृष्टम्।। विभज्यमानाश्चान्ये शब्दधर्माऽन्येऽर्थध
र्मा अन्ये विज्ञानधर्मा इत्येतेषां विभक्तः पंथाः।। तत्रसमापन्नस्ययोगिनोयो
गवाद्यर्थः समाधिप्रज्ञायां समारूढः सचेत शब्दज्ञान विकल्पानुविद्धउ
पावर्तते सासंकीर्णासमापत्तिः सवितर्केत्युच्यते।। यदापुनः शब्दसंकेत
स्मृतिपरिशुद्धौश्रुतानुमानज्ञान विकल्पशून्यायां समाधिप्रज्ञायां स्वरूप
मात्रेणावस्थितोर्थस्तत्स्वरूपाकारमात्रतयैवावच्छिद्यते साचनिर्वितर्का
समापत्तिः।। तत्परं प्रत्यक्षं। तच्चश्रुतानुमानयोर्बीजम्।। ततःश्रुतानुमानेप्रभव
तः।। नचश्रुतानुमानज्ञानसहभूतं तद्दर्शनम्।। तस्मादसंकीर्णं प्रमाणान्त
रेण योगिनो निर्वितर्कसमाधिजंदर्शनमिति।। निर्वितर्कायाःसमापत्तेर
स्याः सूत्रेण लक्षणं द्योत्यते।। स्मृतिपरिशुद्धौ स्वरूपशून्येवार्थमात्रनिर्भासा

पा॰यो॰ निर्वितर्का॥ याशब्दसंकेतश्रुतानुमानज्ञानविकल्पस्मृतिपरिशुद्धौ ग्राह्यस्वरू
१३ पोपरक्तप्रज्ञा स्वमिव प्रज्ञारूपं ग्रहणात्मकं त्यक्त्वा पदार्थमात्रस्वरूपा ग्राह्यस्व
रूपापन्नेव भवति सा तदा निर्वितर्का समापत्तिः॥ तथा च व्याख्याता॥ तस्या
एकबुद्ध्युपक्रमो ह्यर्थात्मा॥ अणुप्रचयविशेषात्मा गवादिर्घटादिर्वा लोकः॥
स च संस्थानविशेषो भूतसूक्ष्माणां साधारणो धर्म आत्मभूतः फलेन व्यक्तेना
नुमितः स्वव्यञ्जकाञ्जनः॥ प्रादुर्भवति धर्मान्तरोदये च तिरोभवति॥ स एष धर्मो
ऽवयवीत्युच्यते॥ योसावेकश्च महांश्च अणीयांश्च स्पर्शवांश्च क्रियाधर्मकश्च
अनित्यश्च॥ तेनावयविना व्यवहाराः क्रियन्ते॥ यस्य पुनरवस्तुकः स प्रचयविशेषः
सूक्ष्मञ्च कारणमनुपलभ्यं॥ तस्यावयव्यभावात्॥ अतद्रूपप्रतिष्ठं मिथ्याज्ञानम् रामः

००००००० . . . अत्र त्यमेकम्पत्रन्नष्टम् . . . . ॥ १३

ता एव सबीजः समाधिः ।। ताश्चतस्रः समापत्तयो बहिर्वस्तु बीजा इति समाधिरपि

सबीजः ।। तत्र स्थूलेर्थे सवितर्को निर्वितर्कः सूक्ष्मेर्थे सविचारो निर्विचार इति ।।

स चतुर्द्धोपसंख्यातः समाधिरिति ।। निर्विचारवैशारद्येऽध्यात्मप्रसादः ।। अशु

द्ध्यावरणमलापेतस्य प्रकाशात्मनो बुद्धिसत्वस्य रजस्तमोभ्यामनभिभूतः स्वच्छः

स्थितिप्रवाहो वैशारद्यम् ।। यदा निर्विचारस्य समाधेर्वैशारद्यमिदं जायते तदा

योगिनो भवत्याध्यात्मप्रसादो भूतार्थविषयः क्रमानुरोधी स्फुटः प्रज्ञालोकः ।।

तथा चोक्तम् ।। प्रज्ञाप्रसादमारुह्य अशोच्यः शोचतो जनान् ।। भूमिष्ठानिव

शैलस्थः सर्वान्प्राज्ञोनुपश्यति ।। ऋतंभरा तत्र प्रज्ञा ।। तस्मिन्समाहितचित्त

स्य या प्रज्ञा जायते तस्या ऋतंभरेति संज्ञा भवति ।। अन्वर्था च सा सत्यमेव बिभर्ति

न तत्र विपर्यासज्ञानगन्धोप्यस्तीति ।। तथा चोक्तम् ।। आगमेनानुमानेन ध्यानाभ्यास

रसेन च ।। त्रिधा प्रकल्पयन्प्रज्ञा

पा॰यो॰ लभते योगमुत्तमम् इति ॥ सा पुनः श्रुतानुमानप्रज्ञाभ्यामन्यविषया विशेषार्थ
१४ त्वात् ॥ श्रुतमागमविज्ञानं तत्सामान्यविषयं न ह्यागमेन शक्यो विशेषोऽभिधा
तुं कस्मात् न हि विशेषेण कृतसंकेतः शब्द इति ॥ तथानुमानं सामान्यविषय
14 यमेव ॥ यत्र प्राप्तिस्तत्र गतिः यत्राप्राप्तिस्तत्र न भवति गतिरित्युक्तम् ॥ अनुमा
नेन च सामान्येनोपसंहारः ॥ तस्मात् श्रुतानुमानविषयो न विशेषः कश्चिदस्तीति ॥
न चास्य सूक्ष्मव्यवहितविप्रकृष्टस्य वस्तुनो लोकप्रत्यक्षेण ग्रहणम् ॥ न चास्य
विशेषस्याप्रमाणकस्याभावोऽस्तीति समाधिप्रज्ञानिर्ग्राह्य एव स वि
शेषो भवति ॥ भूतसूक्ष्मगतो वा पुरुषगतो वा तस्माच्छ्रुतानुमानप्रज्ञाभ्याम
न्यविषया सा प्रज्ञा विशेषार्थत्वादिति ॥ समाधिप्रज्ञाप्रतिलम्भे योगिनः राम:
प्रज्ञाकृतः संस्कारो नवो नवो जायते ॥ त—— १४

जः संस्कारोन्यसंस्कारप्रतिबंधी ॥ समाधिप्रज्ञाप्रभवः संस्कारो व्युत्थान
संस्काराशयं वाधते ॥ व्युत्थानसंस्काराभिभवात् तत्प्रभावाः प्रत्यया
न भवंति प्रत्ययनिरोधे समाधिरुपतिष्ठते ॥ ततः समाधिजा प्रज्ञा ततः
प्रज्ञाकृताः संस्कारा इति नवो नवः संस्काराशयो जायते ततश्च प्र
ज्ञा ततश्च संस्कारा इति । कथमसौ संस्कारातिशयश्चित्तं साधिका
रं न करिष्यतीति । न ते प्रज्ञाकृताः संस्काराः क्लेशक्षयहेतुत्वात्
चित्तमधिकारविशिष्टं कुर्वन्ति चित्तं हि ते स्वकार्यादवसादयंति ख्या
तिपर्यवसानं हि चित्तचेष्टितमिति । किंच ॥ तस्यापि निरोधे सर्वनि
रोधात निर्बीजः समाधिः सन केवलं समाधिप्रज्ञाविरोधी प्रज्ञाकृ

पा॰यो॰

२५

नामपिसंस्काराणांप्रतिबंधी भवति। कस्मात्‌निरोधजः संस्काराः स
माधिजान्‌ संस्कारान्‌ बाधत इति निरोधस्थितिकालक्रमानुभवेन निरोध
चित्तकृतसंस्कारास्तित्वमनुमेयं। व्युत्थाननिरोधसमाधिप्रभवैः स
हकैवल्यभागीयैः संस्कारैश्चित्तं स्वस्यां प्रकृताववस्थितायां प्रवि
लीयते तस्मात्ते संस्काराः चित्तस्याधिकारविरोधिनो न स्थितिहेतवो भवंती
ति यस्मादवसिताधिकारं सह कैवल्यभागीयैः संस्कारैश्चित्तं निवर्त्तते।
तस्मिन्‌ निवृत्ते पुरुषः स्वरूपमात्रप्रतिष्ठः शुद्धः केवलो मुक्त इ
त्युच्यत इति॥ इति पातंजले सांख्यप्रवचने योगशास्त्रे समाधिपादः
प्रथमः॥ १॥ सिद्धिरस्तु॥ उद्दिष्टः समाहितचित्तस्य योगः कथं व्यु

२

थितचित्तोपियोगयुक्तः स्यादित्येवदारभ्यते । तपःस्वाध्यायेश्वरप्र
णिधानानि क्रियायोगः ॥ नातपस्विनो योगः सिध्यति अनादिक्लेशक
वासनाचित्रा प्रत्युपस्थितविषयजालाचाशुद्धिर्नान्तरेण तपः संभेदमाप
द्यत इति तपस उपादानं । तच्च चित्तप्रसादनमबाधमानमनेनासेव्य
मिति मन्यते । स्वाध्यायः प्रणवादिपवित्राणां जपः । मोक्षशास्त्राध्यय
नं वा ईश्वरप्रणिधानं सर्वक्रियाणां परमगुरावर्पणं । तत्फलसंन्यासो वा
सहि क्रियायोगः ॥ समाधिभावनार्थः क्लेशतनूकरणार्थश्च ॥ सहि आ
सेव्यमानः समाधिं भावयति ॥ क्लेशांश्च प्रतनूकरोति । प्रतनूकृतान्
क्लेशान् प्रसंख्यानाग्निना दग्धबीजकल्पानप्रसवधर्मिणः करिष्य

तीति॥ ते तनूकरणान् पुनः क्लेशाः स्वपरामृष्टाः सत्त्वपुरुषान्यतामात्रख्या
तिः॥ सूक्ष्माग्रज्ञासमाप्ताधिकारा प्रतिप्रसवायन कल्पिष्यत इति। अथ
के क्लेशाः कियंतो वेति। २॥ अविद्यास्मितारागद्वेषाभिनिवेशाः क्लेशाः॥
क्लेशा इति पंचविपर्यया इत्यर्थः। ते स्पंदमाना गुणाधिकारं द्रढयंति।
प्रस्था परिणाममवस्थापयंति। कार्यकारणस्रोत उन्नमयंति परस्परानु
ग्रहतंत्रा भूत्वा कर्मविपाकं चाभिनिर्हरंति। ३॥ अविद्याक्षेत्रमुत्तरेषां
प प्रसुप्ततनुविच्छिन्नोदाराणां॥ अविद्याक्षेत्रं प्रसवभूमिरुत्तरेषामस्मि
तादीनां चतुर्विकल्पानां प्रसुप्ततनुविच्छिन्नोदाराणां। तत्र का प्रसुप्तिः
चेतसि शक्तिमात्रप्रतिष्ठानां बीजभावोपगमः। तस्य प्रबोध आलंबने

संमुखीभावः। प्रसंख्यानवतो दग्धक्लेशबीजस्य संमुखीभूतेप्यालंबने
नासौ बीजभावः पुनरस्ति। दग्धबीजस्य कुतः प्ररोह इति॥ अतः क्षीणक्ले
शः कुशलश्चरमदेह इत्युच्यते। तत्रैव सा दग्धबीजभावं पंचमी क्लेशाव
स्था स्था नान्यत्रेति। सतां क्लेशानां तदा बीजसामर्थ्यं दग्धमिति॥ विषयस्य
संमुखीभावेपि सति न भवत्येषां प्रबोध इत्युक्ता प्रसुप्तिः। दग्धबीजा
नामप्रबोधस्तनुत्वमुच्यते। प्रतिपक्षभावनोपहताः क्लेशास्तनवो भव
न्ति। तथा विच्छिद्य विच्छिद्य तेन तेनात्मना पुनः समुदाचरंतीति विच्छि
न्नाः कथं रागकाले क्रोधस्यादर्शनात्। नहि रागकाले क्रोधः समुदाचर
ति रागश्च क्वचिद्दृश्यमानो न विषयांतरे नास्ति। नैकस्यां स्त्रियां चै

चैत्ररक्त इति नान्यासु स्त्रीषु विरक्तः किंतु तत्र रागो लब्धवृत्तिः॥ अन्यत्र
भविष्यद्वृत्तिरिति॥ स हि तदा प्रसुप्ततनुविच्छिन्नो भवति। विषये यो लब्ध
वृत्तिः स उदारः। सर्व एवैते क्लेशविषयत्वं नातिक्रामंति। कस्तर्हि विच्छिन्नः
प्रसुप्तस्तनुरुदारो वा क्लेश इति उच्यते। सत्यमेवैतत् किंतु विशिष्टाना
मेवैतेषां विच्छिन्नादित्वं। यथैव प्रतिपक्षभावनातो निवृत्तस्तथैव
स्वव्यंजकांजनेनाभिव्यक्त इति॥ सर्व एवामी क्लेशा अविद्याभेदाः॥
कस्मात्सर्वेष्वविद्यैवाभिप्लवते यदविद्यया वस्त्वाकार्यते तदेवानु
शेरते क्लेशाः। विपर्यासप्रत्ययकाल उपलभ्यंते। क्षीयमाणां चाविद्या
मनु क्षीयंत इति। तत्राविद्यास्वरूपमुच्यते। अनित्याशुचिदुःखाना

त्मसुनित्यशुचिसुखात्मख्यातिरविद्या।अनित्येकार्येनित्यख्यातिः।त
द्यथा॥ध्रुवापृथिवीध्रुवासचंद्रतारकाद्यौः।अमृतादिवौकसइति।
तथाशुचौपरमबीभत्सेकायेशुचिख्यातिः।उक्तंच।स्थानाद्बीजादुप
ष्टंभान्निस्यंदान्निधनादपि॥का——धेयशौचत्वात्पंडिताह्यशुचिं
विदुः।इत्यशुचौशुचिख्यातिर्दृश्यते।नवेवशशांकलेखाकमनीयेयंकन्या
नि मध्वमृतावयर्मितेवचंद्रंभित्वानिःसृतेवज्ञायते।नीलोत्पलपत्रायता
क्षीहावगर्भाभ्यांलोचनाभ्यांजीवलोकमाश्वासयंतीति।कस्यके
नाभिसंबंधः।भवतिचैवमशुचौशुचिविपर्यासप्रत्ययइति।एतेनापु
ण्येपुण्यप्रत्ययः तथैवानर्थेचार्थप्रत्ययोव्याख्यातः।तथादुःखेसुख

ख्यातिं वक्ष्यति। परिणामतापसंस्कारदुःखैर्गुणवृत्तिविरोधाच्च दुःखमेव स
र्वं विवेकिन इति। तत्र दुःखे सुखख्यातिरविद्या। तथानात्मन्यात्मख्यातिः। बाह्योपकर
णेषु चेतनाचेतनेषु। भोगाधिष्ठाने वा शरीरे। पुरुषोपकरणे वा मनसि। अनात्मन्यात्म
ख्यातिरिति। तथैतदत्रोक्तं। व्यक्तमव्यक्तं वा सत्वमात्मत्वेनाभिप्रतीत्य। तस्य संपद
मनुनंदत्यात्मसंपदं मन्वानः। तस्य व्यापदमनुशोचत्यात्मव्यापदं मन्वानः। स सर्वो
प्रतिबुद्ध इत्येषा चतुष्पदा भवत्यविद्या मूलमस्य क्लेशसंतानस्य कर्माशयस्य च सविपा
कस्येति। तस्याश्चामित्रागोष्पदवद्वस्तुसतत्वं विज्ञेयं। यथा नामित्रो मित्राभा
वो न मित्रमात्रं किंतु तद्विरुद्धः सपत्नः। यथा वागोष्पदं न गोष्पदाभावो न गोष्पदमा
त्रं किंतु देश एव ताभ्यामन्यद्वस्त्वंतरं। एवमविद्या न प्रमाणं न प्रमाणाभावः किं
तु विद्याविपरीतं ज्ञानांतरमविद्येति॥५॥ दृग्दर्शनशक्त्योरेकात्मतेवास्मिता॥

पुरुषो दृक्शक्तिर्बुद्धिर्दर्शनशक्तिरित्येतयोरेकस्वरूपापत्तिरिवास्मिता क्लेश उच्य
ते ॥ भोक्तृभोग्यशक्त्योरत्यंतविभक्तयोरत्यंतासंकीर्णयोरविभागप्राप्ताविव सत्यां
भोगः कल्पते । स्वरूपप्रतिलंभे तु तयोः कैवल्यमेव भवति कुतो भोग इति । तथा चो
क्तं ॥ बुद्धितः परं पुरुषमाकारशीलविद्यादिभिर्विभक्तमपश्यन्कुर्यात्तत्रात्मबुद्धिं मोहनेति ।
६ ॥ सुखानुशयी रागः ॥ सुखाभिज्ञस्य सुखानुस्मृतिपूर्वः सुखे तत्साधने वा यो गर्धस्तृ
ष्णा लोभः स राग इति । ७ । दुःखानुशयी द्वेषः ॥ दुःखाभिज्ञस्य दुःखानुस्मृतिपूर्वो दुः
खे तत्साधने वा यः प्रतिघो मन्युर्जिघांसा क्रोधः स द्वेषः । ८ । स्वरसवाही विदुषोपि तथा रू
ढोऽभिनिवेशः ॥ सर्वस्य प्राणिन इयमात्माशीर्नित्या भवति मा न भूवं भूयासमिति न चा
ननुभूतमरणधर्मकस्यैषा भवत्यात्माशीः ॥ एतया च पूर्वजन्मानुभवः प्रतीयते स चाय
मत्यंतमूढेषु दृश्यते क्लेशस्तथा विदुषोपि विज्ञातपूर्वापरांतस्य रूढः कस्मात्स
मानाहि तयोः कुशलाकुशलयोर्मरणदुःखानुभवादियं वासनेति ९ ते प्रतिप्रसव
मभिनिवेशः क्लेशः स्वरसवाही कृमेरपि जातमात्रस्य प्रत्यक्षानुमानागमैरसंभावितो मरण
त्रास उच्छेददृष्ट्यात्मकः पूर्वजन्मानुभूतं मरणदुःखमनुमापयति । यथा चायं ॥ २ ।

हेयाःसूक्ष्माः॥ते पंच क्लेशा दग्धबीजकल्पाः योगिनश्चरिताधिकारे चेतसि प्रलीने सह
तेनैवास्तं गच्छंति॥स्थितानां तु बीजभावोपगतानां॥ १०॥ ध्यानहेयास्तद्वृत्तयः॥ क्लेशा
नां या वृत्तयः स्थूलास्ताः क्रियायोगेन तनूकृताः सत्यः प्रसंख्यानेन ध्यानेन हातव्याः
यावत्सूक्ष्मीकृता यावद्दग्धबीजकल्पा इति। यथा वस्त्राणां स्थूलो मलः पूर्वं निर्धूयते
पश्चात्सूक्ष्मो यत्नेनोपायेन चापनीयते। तथा अल्पप्रतिपक्षाः स्थूला वृत्तयः क्लेशानां सू
क्ष्मास्तु महाप्रतिपक्षा इति॥ ११॥ क्लेशमूलः कर्माशयो दृष्टादृष्टजन्मवेदनीयः॥ तत्र पु
त्र ण्यापुण्यकर्माशयो लोभमोहक्रोधप्रभवः। स दृष्टजन्मवेदनीयश्चादृष्टजन्मवेदनीयश्च।
तत्र तीव्रसंवेगेन मंत्रतपःसमाधिभिर्निर्वर्तित ईश्वरदेवतामहर्षिमहानुभावानामा
राधनाद्यः परिनिष्पन्नः स सद्यः परिपच्यते पुण्यकर्माशय इति। तथा तीव्रक्लेशेन
भीतव्याधितकृपणेषु विश्वासोपगतेषु वा महानुभावेषु वा तपस्विषु कृतः पु
नः पुनरपकारः स चापि पापकर्माशयः सद्य एव विपच्यते। यथा नंदीश्वरः कुमा

रोमनुष्यपरिणामं हित्वा देवत्वेन परिणतः। तथानहुषोपि देवानामिंद्रः स्वकं परिणामं हि
त्वा तिर्यक्त्वेन परिणत इति॥ तत्र नारकाणां नास्ति दृष्टजन्मवेदनीयः कर्माशयः। क्षीणक्ले
शानामपि। नास्त्य दृष्टजन्मवेदनीयः कर्माशय इति।१२। सति मूले तद्विपाको जात्यायुर्भोगाः।
सत्सु क्लेशेषु कर्माशयो विपाकारंभी भवति नोच्छिन्नक्लेशमूलः। यथा तुषावनद्धाः शालि
तंडुला अदग्धबीजभावा वा प्ररोहसमर्था भवंति नापनीततुषा दग्धबीजभावा वा। त
थाक्लेशावनद्धः कर्माशयो विपाकप्ररोही भवति। नापनीतक्लेशो न प्रसंख्यानद
ग्धबीजभावो वेति। स च विपाकस्त्रिविधो जातिरायुर्भोग इति। तत्रेदं विचार्यते। किमे
कं कर्म एकस्य जन्मनः कारणं। अथैकं कर्मानेकजन्माक्षिपतीति। द्वितीया विचारणा॥
किमनेकं कर्म अनेकं जन्म निर्वर्तयति। आथानेकं कर्मैकं जन्म निर्वर्त्तयतीति। न
तावदेकं कर्मैकस्य जन्मनः कारणं। कस्मादनादिकालप्रचितस्य असंख्येयस्यावि
शिष्टस्य कर्मणः सांप्रतिकस्य च फलक्रमानियमात्। अनाश्वासो लोकस्य प्रसक्तः

सचानिष्ट इति। नचैकं कर्मानेकस्य जन्मनः कारणं कस्मादनेकेषु जन्मसु एकैकमेव क
र्मानेकस्य जन्मनः कारणं इत्यवशिष्टस्य विपाककालाभावः प्रसक्तः सचाप्यनिष्ट इति। नचा
नेकं पूर्व~~दोषानुषंगः। तत्रा~~नेकं जन्मकारणं॥ कस्मात्। तदनेकं कर्म युगपन्न भ
वतीति क्रमेण वाच्यं। तथा च पूर्वदोषानुषंगः। तस्माज्जन्मप्रायणांतरे कृतः पुण्या
पुण्यकर्माशयप्रचयो विचित्रः प्रधानोपसर्जनभावेनावस्थितः प्रायणाभिव्यक्तः
एकप्रघट्टकेन मरणं प्रसाध्य संमूर्छित एकमेव जन्म करोति। तच्च जन्म तेनैव क
र्मणा लब्धायुष्कं भवति। तच्चजन्मतेनै तस्मिन्नायुषि तेनैव कर्मणा भोगः संपद्य
त इत्यसौ कर्माशयो जन्मायुर्भोगहेतुत्वात् त्रिविपाकोभिधीयत इति। अत एक
भविकः कर्माशय उक्त इति। दृष्टजन्मवेदनीयस्त्वेकविपाकारंभी भोगहेतुत्वात्
द्विविपाकारंभी वा आयुर्भोगहेतुत्वात्॥ त्रिविपाकारंभी वा जन्मायुर्भोगहेतुत्वात् नंदी

ध्वरवन्नङ्गषवहेति। क्लेशकर्मविपाकानुभवनिर्वर्तिताभिस्तु वासनाभिरनादिका
लसंमूर्छितमिदं चित्तं विचित्रीकृतमिव सर्वतो मत्स्यजालं ग्रंथिभिरिवाततं इत्येता
अनेकभवपूर्विका वासना। यस्त्वयं कर्माशय एष एवैकभविक उक्त इति। ये संस्काराः स्मृ
तिहेतवः वासनास्ताश्चानादिलीना इति। यस्त्वसावेकभविकः कर्माशयः स नियतविपाक
नियतविपाकश्च १ श्च। तत्र दृष्टजन्मवेदनीयस्य नियतविपाकस्यैवायं नियमो न त्वदृष्टजन्मवे
दनीयस्यानियतविपाकस्य वा। कस्माद्यो ह्यदृष्टजन्मवेदनीयो नियतविपाकस्
तस्य त्रयी गतिः। कृतस्याविपक्वस्य नाशः। प्रधानकर्मण्यावापगमनं वा॥ निय
तविपाकप्रधानकर्मणाभिभूतस्य वा चिरमवस्थानमिति। तत्र कृतस्यावि प
क्वस्य नाशो। यथा शुक्लकर्मोदयादिहैव नाशः कृष्णस्य यत्रेदमुक्तं द्वे द्वेह कर्मणी वेदि
तव्ये पापकस्यैको राशिः पुण्यकृतोपहंति। तदिच्छस्व कर्माणि सुकृतानि कर्तुमि
हैव ते कर्म कवयो वेदयंते। प्रधानकर्मण्यावापगमनं। यत्रेदमुक्तं स्यात्स्वल्पः

संकरः सपरिहारः सप्रत्यवमर्षः कुशलस्य नापकर्षायालं । कस्मात् कुशलं हि मे
बह्वन्यदस्ति । यत्रायमावापंगतः स्वर्गेपि पकर्षमल्पं भविष्यतीति । नियतविपाकप्रधा
नकर्मणाभिभूतस्य वा चिरमवस्थानं कथमिति । अदृष्टजन्मवेदनीयस्यैव नियत
विपाकस्य कर्मणः समानं मरणमभिव्यक्तिकारणमुक्तं न त्वदृष्टजन्मवेदनीयस्या
नियतविपाकस्य । यत्त्वदृष्टजन्मवेदनीयं कर्मानियतविपाकं तन्नश्येत् । आवापं
वा गच्छेत् । अभिभूतं वा चिरमप्युपासीत । यावत्समानं कर्माभिव्यंजकं निमित्तमस्य न वि
पाकाभिमुखं करोतीति । तद्विपाकस्यैव देशकालनिमित्तानवधारणादियं कर्मगति
श्चित्रा दुर्विज्ञाना चेति ॥ न चोत्सर्गस्यापवादान्निवृत्तिरित्येकभविकः कर्माशयोनु
ज्ञायत इति ॥ १३ तेह्लादपरितापफलाः पुण्यापुण्यहेतुत्वात् ॥ ते जन्मायुर्भोगाः
पुण्यहेतुकाः सुखफलाः । अपुण्यहेतुका दुःखफला इति । यथा चेदं दुःखं प्रति
कूलात्मकं एवं विषयसुखकालेपि दुःखमस्त्येव प्रातिकूलात्मकं योगि

नःकथं तदुपपद्यते ॥१४॥ परिणामतापसंस्कारदुःखैर्गुणवृत्तिविरोधाच्च दुःखमे
व सर्वं विवेकिनः ॥ सर्वस्यायं रागानुविद्धश्चेतनाचेतनसाधनाधीनः सुखानु
भव इति ॥ तत्रास्ति रागजः कर्माशय। तथा च द्वेष्टि दुःखसाधनानि मुह्यति चेति।
द्वेषमोहकृतोप्यस्ति कर्माशयः। तथा चोक्तं॥ नानुपहत्य भूतान्युपभोगः संभवतीति
हिंसाकृतोप्यस्ति शारीरः कर्माशय इति॥ विषयसुखं चाविद्येत्युक्तं॥ या भोगेष्विं
द्रियाणां तृप्तेरुपशांतिस्तत्सुखं॥ या लौल्यादनुपशांतिस्तद्दुःखं॥ न चेंद्रियाणां
भोगाभ्यासमनु विवर्द्धंते रागाः कौशलानि चेंद्रियाणामिति। तस्मादनुपायः सुख
स्य भोगाभ्यास इति। स खल्वयं वृश्चिकविषभीत इवाशीविषेण दष्टो। यः सुखार्थी वि
षयानुवासितो महति दुःखपंके मग्न इति। एषा परिणामदुःखता नाम प्रतिकूला
सुखावस्थायामपि योगिनमेव क्लिश्नाति। अथ का तापदुःखता। सर्वस्य द्वेषानुविद्धश्चे
तनाचेतनसाधनाधीनस्तापानुभव इति। तत्रास्ति द्वेषजः कर्माशयः। सुखसाधयना

…वैतृष्ण्यं कर्तुं शक्यं कस्मात् यतो भोगाभ्या सम

निच प्रार्थयमानः कायेनवाचामनसा च परिस्पंदते ततः परमनुगृह्णात्युपहंति चेति
पारानुग्रहपीडाभ्यां धर्माधर्मावुपचिनोति । स कर्माशये लोभान्मोहाच्च भवतीत्येषा
तापदुःखतोच्यते । कापुनः संस्कारदुःखता । सुखानुभवात्सुखसंस्काराशयो दुःखा
नुभवादपि दुःखसंस्काराशय इति ॥ एवं कर्मभ्यो विपाकेनुभूयमाने सुखेदुःखेवापु
नः कर्माशयप्रचय इति । एवमिदमनादि दुःखस्रोतो विप्रसृतं योगिनमेव प्रतिकू
लात्मकत्वादुद्वेजयति । कस्मात् अक्षिपात्रकल्पो हि विद्वानिति । यथोर्णातंतुरक्षिपा
त्रेन्यस्तः स्पर्शेन दुःखयति । न अन्येषु गात्रावयवेषु । एवमेतानि दुःखान्यक्षिपात्रकल्पं
योगिनमेव क्लिश्नंति नेतरं प्रतिपत्तारं । इतरं तु स्वकर्मोपहृतं दुःखमुपात्तं त्यजंतं त्यक्तं
त्यक्तमुपाददानं अनादिवासनाविचित्रया चित्तवृत्त्या समंततोऽनुविद्धमिवाविद्यया हात
व्य एवाहंकारममकारानुपातिनं जातं जातं बाह्याध्यात्मिकोभयनिमित्तास्त्रिपर्वाणस्ता
पा अनुप्लवंते । तदेवमनादिना दुःखस्रोतसा व्युह्यमानमात्मानं भूतग्रामं च दृष्ट्वा योगी सर्वदुःख

तपकारणं सम्यग्दर्शनं शरणं प्रपद्यत इति । गुणवृत्तिविरोधाच्च दुःखमेव सर्वं विवेकिनः
प्रख्याप्रवृत्तिस्थितिरूपा बुद्धिगुणाः परस्परानुग्रहतंत्रीभूत्वा शांतं घोरं मूढं वा प्रत्ययं त्रि
गै गुणमेवारभंते ॥ चलं च गुणवृत्तमिति क्षिप्रपरिणामि चित्तमुक्तं ॥ रूपातिशया वृत्त्यतिश
याश्च परस्परेण विरुध्यंते । सामान्यानि त्वतिशयैः सह प्रवर्त्तंते । एवमेते गुणा इतरेत
राश्रयेणोपार्जितसुखदुःखमोहप्रत्यया इति । सर्वे सर्वरूपा भवंति । गुणप्रधानभाव
कृतस्त्वेषां विशेष इति । तस्माद्दुःखमेव सर्वं विवेकिन इति । तदस्य महतो दुःखसमुदाय
स्य प्रभवबीजमविद्या तस्याश्च सम्यग्दर्शनमभावहेतुः । यथा चिकित्साशास्त्रं चतुर्व्यूहं ।
रोगो रोगहेतुरारोग्यं भैषज्यमित्येवमिदमपि शास्त्रं चतुर्व्यूहमेव । तद्यथा । संसारःसंहेतु
संसारहेतुः मोक्षो मोक्षोपाय इति । तत्र दुःखबहुलः संसारो हेयः । प्रधानपुरुषयोः संयोगो
हेयहेतुः । संयोगस्यात्यंतिकी निवृत्तिर्हानं । हानोपायः सम्यग्दर्शनं । तत्र स्वरूपमुपादे

यं वा देयं वा न भवितुमर्हतीति। हाने तस्योच्छेदवादप्रसंगः। उपादाने च हेतुवादः। उभय
प्रत्याख्याने शाश्वतवाद इत्येतत्सम्यग्दर्शनं॥ तदेतच्छास्त्रं चतुर्व्यूहमित्यभिधीयते॥
१५॥ हेयं दुःखमनागतं॥ दुःखमतीतमुपभोगेनातिवाहितं न हेयपक्षे वर्त्तते। वर्त्तमानं च
स्वक्षणे भोगारूढमिति न तत्क्षणांतरे हेयतामापद्यते। तस्माद्यदेवानागतं दुःखं
तदेवाक्षिपात्रकल्पं योगिनं क्लिश्नाति। नेतरं प्रतिपत्तारं॥ तदेव हेयतामापद्यते।
तस्माद्यदेव हेयमित्युच्यते तस्यैव कारणं प्रतिनिर्दिश्यते॥ १६॥ द्रष्टृदृश्ययोः सं
योगो हेयहेतुः। द्रष्टा बुद्धेः प्रतिसंवेदी पुरुषः। दृश्या बुद्धिसत्वोपारूढाः सर्वे धर्माः। त
देतद्दृश्यमयस्कांतमणिकल्पं संनिधिमात्रोपकारि दृश्यत्वेन पुरुषस्य स्वं दृशिरू
पस्य स्वामिनः। अनुभवकर्मविषयतामापन्नमन्यस्वरूपेण प्रतिपन्नमन्यस्वरूपे
पेण प्रतिलब्धात्मकं। स्वतंत्रमपि परार्थत्वात्परतंत्रं। तयोर्दृग्दर्शनशक्त्योरना

त

दिर्यत्कृतः संयोगो हेयहेतुः दुःखकारणमित्यर्थः॥ तथोचोक्तं॥ तत्संयोगहेतुवि
वर्जनात्स्यादयमात्यंतिको दुःखप्रतीकारः। कस्मात् दुःखहेतोः परिहार्यस्य प्रती
कारदर्शनात्। कस्माद्यथा पादतलस्य भेद्यता। टंकस्य भेतृत्वं। परिहारः कंटकस्य पा
दानधिष्टानं पादत्राणव्यवहितेन वाधिष्टानमेतत्त्रयं यो वेद लोके स तत्र प्रतीका
रमारभमाणो भेदजं दुःखं नाप्नोति। कस्मात् त्रित्वोपलब्धिसामर्थ्यादिति। अत्रापि ताप
[illegible]स्य रजसः सत्वमेव तप्यं। कस्मात्। तापक्रियायाः कर्मस्थत्वात्। सत्वे कर्मणि तत्क्रिया
णो परिणामिनि निष्क्रिये क्षेत्रज्ञे दर्शितविषयत्वात्। सत्वे तु तप्यमाने तदाकारानुरोधी पु
रुषोनुतप्यत इति। दृश्यस्वरूपमुच्यते। १८॥ प्रकाशक्रियास्थितिशीलं भूतेंद्रि
यात्मकं भोगापवर्गार्थं दृश्यं। प्रकाशशीलं सत्वं। क्रियाशीलं रजः। स्थितिशीलं तम इति।
एते गुणाः परस्परोपरक्तविभागाः संयोगवियोगधर्माण इतरेतरोपाश्रयेण उपार्जि

तन्मूर्त्तयः। परस्परांगांगित्वेप्यसभिन्नशक्तिप्रविभागास्तुल्यजातीयास्तुल्यजौतीयश
क्तिप्रविभागास्तु क्तिभेदानुपातिनः। प्रधानतत्ववेलायामुपदर्शितसंनिधानाः। गुणत्वे
पिव्यापारमात्रेण प्रधानांतर्नीतेनौनुमितास्थिताः। पुरुषार्थकर्त्तव्यतयाप्रयुक्तसा
मर्थ्याः। संनिधिमात्रोपकारिणोऽयस्कीतमणिकल्याः। प्रत्ययमंतरेणैकतमस्य
वृत्तिमनुवर्त्तमानाः। प्रधानशब्दवाच्याभवंति। एतद्दृश्यंइत्युच्यते। तदेतद्भूतेंद्रि
यात्मकंभूतभावेनपृथिव्यादिनासूक्ष्मस्थूलेनपरिणमते। तथेंद्रियभावेन
श्रोत्रादिनासूक्ष्मस्थूलेनपरिणमत इति। तत्तुनाप्रयोजनंप्रयोजनमुररीकृत्यप्र
वर्त्ततइति। भोगापवर्गार्थंहितत्दृश्यंपुरुषस्येति॥ तत्रेष्टानिष्टगुणस्वरूपा
वधारणमविभागापन्नंभोगो भोक्तुःस्वरूपावधारणमपवर्गइति॥ द्वयोरतिरि
क्तमन्यद्दर्शनंनास्ति॥ तथाचोक्तं। अयंतखलुत्रिषुगुणेषुकर्तृषकर्त्तरिचपु

रुषे तुल्यजातीये चतुर्थे तत्क्रियासाक्षिण्युपनीयमानान्सर्वभावानुपपन्नाननुपश्य
न्नदर्शनमन्यच्छंकत इति। तावेतौ भोगापवर्गौ बुद्धिकृतौ बुद्धावेव वर्त्तमानौ कथं पुरुषे व्य
पदिश्येते इति। यथा विजयः पराजयो वा योधेषु वर्त्तमानः स्वामिन्यपदिश्यते। सहि
तत्फलस्य भोक्तेति। एवं बंधमोक्षौ बुद्धावेव वर्त्तमानौ पुरुषे व्यपदिश्येते। स हि तत्फल
स्य भोक्तेति। बुद्धेरेव पुरुषार्थापरिसमाप्ति बंधः॥ तदर्थावसायो मोक्ष इति। एतेन ग्रहण
धारणविज्ञानोहापोहतत्वज्ञानाभिनिवेशा बुद्धौ वर्त्तमानाः पुरुषेध्यारोपितसद्भावाः
स हि तत्फलस्य भोक्तेति॥ दृश्यानां तु गुणानां स्वरूपभेदावधारणार्थमिदमारभ्यते॥
॥१८॥ विशेषाविशेषलिंगमात्रालिंगानि गुणपर्वाणि॥ तत्राकाशवाय्वग्न्युदकभू
मयो भूतानि शब्दस्पर्शरूपरसगंधतन्मात्राणामविशेषाणां विशेषाः॥ तथा श्रोत्रत्वक्
चक्षुर्जिह्वाघ्राणानि बुद्धीन्द्रियाणि वाक्पाणिपादपायूपस्थाः कर्मेंद्रियाणि। एकादशं

पा॰ यो॰ श्री विवेशकस्यास्य ष

२५ मनःसर्वार्थमित्येतानिस्मितालक्षणस्याविशेषाः।गुणानामेषषोडशकोविशेषपरिणामः

षडविशेषाः।तद्यथा।शब्दतन्मात्रं।स्पर्शतन्मात्रं।रूपतन्मात्रं।रसतन्मात्रं।गंधतन्मात्रं।चेति॥

एकद्वित्रिचतुःपंचलक्षणाःशब्दादयःपंचाविशेषाःषष्ठश्चाविशेषोस्मितामात्र इत्येते सत्ता

28 मात्रस्यात्मनोमहतःषडविशेषपरिणामाः।यत्तत्परमविशेषेभ्योलिंगमात्रंमहत्त

त्वं।तस्मिन्नेते सत्तामात्रे महत्यात्मन्यवस्थाय विवृद्धिकाष्ठामनुभवंति।प्रलीयमानाः प्रतिसं

सृज्यमानाश्चतस्मिन्नेवसत्तामात्रेमहत्यात्मन्यवस्थाययत्तन्निःसत्तासत्तं।निःसदस

दव्यक्तमलिंगंप्रधानंतत्प्रतियंतीत्येषतेषांलिंगमात्रपरिणामोनिःसत्तासत्तंचा

लिंगपरिणाम इति।अलिंगावस्थायांनपुरुषार्थोहेतुः।नालिंगावस्थायामादौपु

रुषार्थताकारणंभवतीति।नासौपुरुषार्थकृतेतिनित्याख्यायते।त्रयाणांत्ववस्था

विशेषाणामादौपुरुषार्थताकारणंभवतीति।सचार्थोहेतुर्निमित्तंकारणंभवती

त्यनित्याख्यायते।गुणास्तुसर्वधर्मानुपातिनोनप्रत्यस्तमयंतेनोपजायंते।व्यक्तिभि

त्प

रेवातीतानागतव्ययागमवतीभिर्गुणान्वयिनीभिरुपजनापायधर्मकाइवप्रत्यवभा
संते। यथादेवदत्तोदरिद्राति कस्माद्यतोस्यम्रियंतेगावइति। गवामेवमरणात्तस्यदरि
द्राणंनस्वरूपहानादितिसमःसमाधिः। लिंगमात्रमलिंगस्यप्रत्यासन्नंतत्रतत्संसृ
ष्टंविविच्यतेक्रमानतिवृत्तेः। तथाषडविशेषालिंगमात्रेसंसृष्टाविविच्यंते। परि
णामक्रमनियमात्। तथातेष्वविशेषेषुभूतेंद्रियाणिविविच्यंते। तथाचोक्तंपुरस्ता
न्नविशेषेभ्यःपरंतत्वांतरमस्तीतिविशेषाणांनास्तितत्वांतरपरिणामः। तेषांतुधर्मल
क्षणावस्थापरिणामाव्याख्यास्यिष्यंते। व्याख्यातंदृश्यं। द्रष्टुःस्वरूपावधारणार्थ
मिदमारभ्यते॥१९॥ द्रष्टादृशिमात्रःशुद्धोऽपिप्रत्ययानुपश्यः॥ दृशिमात्रइतिदृ
क्शक्तिरेवविशेषणापरामृष्टेत्यर्थः। सपुरुषोबुद्धेःप्रतिसंवेदीसबुद्धेर्नसरूपो
नात्यंतविरूपइति। नतावत्सरूपःकस्मात्ज्ञाताज्ञातविषयत्वात्। परिणामिनीहिबुद्धिः॥
तस्याश्चविषयोगवादिर्घटादिश्चज्ञातश्चेतिपरिणामित्वंदर्शयति। सदाज्ञानवि

रूप १

षयत्वं तु पुरुषस्यापरिणामित्वं परिदीपयति। कस्मात्। न हि बुद्धिश्च नाम पुरुषवि
षयश्च स्याद् गृहीतागृहीता चेति सिद्धं पुरुषस्य सदा ज्ञातविषयत्वं। ततश्चापरि
णामित्वमिति। किंच परार्था बुद्धिः संहत्यकारित्वात्। स्वार्थः पुरुष इति॥ तथा सर्वा
र्थाध्यवसायकत्वात् त्रिगुणा बुद्धिः त्रिगुणत्वात् अचेतनेति। गुणानां तूपद्रष्टा पु
रुष इत्यतो न सरूपः। अस्तु तर्हि विरूप इति। नात्यंतं विरूपः कस्मात् शुद्धोप्यसौ प्र
त्ययानुपश्यो यतः॥ प्रत्ययं बौद्धमनुपश्यति तमनुपश्यन्नतदात्मापि तदात्मक
इव प्रत्यवभासते। तथा चोक्तं। अपरिणामिनी हि भोक्तृशक्तिरप्रतिसंक्रामा च प
रिणामिन्यर्थे प्रतिसंक्रांतेव तद्वृत्तिमनुपतति। तस्याश्च प्राप्तचैतन्योपग्रहरू
पाया बुद्धिवृत्तेरनुकारमात्रतया बुद्धिवृत्त्यविशिष्टा हि बुद्धिवृत्तिरित्याख्यायते।
तदर्थ एव दृश्यस्यात्मा॥ दृशिरूपस्य पुरुषस्य कर्मविषयतामापन्नं दृश्यमिति।

तदर्थ एव दृश्यस्यात्मा भवति। स्वरूपं भवतीत्यर्थः। तत्स्वरूपं पररूपेण प्रतिल
ब्धात्मकं भोगापवर्गार्थतायां कृतायां पुरुषेण न दृश्यत इति। स्वरूपहानादस्य
नाशः प्राप्तः न तु विनश्यति कस्मात् २१॥ कृतार्थं प्रति नष्टमप्यनष्टं तदन्यसा
धारणत्वात्॥ कृतार्थमेकं पुरुषं प्रति दृश्यं नष्टमपि नाशं प्राप्तमप्यनष्टं तदन्य
पुरुषसाधारणत्वात्। कुशलं पुरुषं प्रति नाशं प्राप्तमप्यकुशलान् पुरुषान्प्रति न
कृतार्थमिति। तेषां दृश्यं कर्मविषयतामापन्नं लभत एव पररूपेणात्मस्वरू
पमिति। अतश्च दृग्दर्शनशक्त्योर्नित्यत्वात् अनादिश्च संयोगो व्याख्यात इति
तथा चोक्तं। धर्मिणामनादिसंयोगात् धर्ममात्राणामप्यनादिः संयोग इति। संयो
गस्वरूपाभिधित्सयेदं सूत्रं प्रवर्तते॥ २२ स्वस्वामिशक्त्योः स्वरूपोपलब्धिहेतुः सं
योगः॥ पुरुषः स्वामी दृश्येन स्वेन दर्शनार्थं संयुक्तः। तस्मात्संयोगाद्दृश्यस्योपल

पा॰ यो॰
२७

द्धिर्या स भोगः। या तु द्रष्टुः स्वरूपोपलब्धिः सोपवर्गः। दर्शनकार्यावसानः संयोगः इति

दर्शनं वियोगस्य कारणमुक्तम् २

दर्शनमदर्शनस्य प्रतिद्वंद्वीति अदर्शनं संयोगनिमित्तमुक्तं। नात्र दर्शनं मोक्षकारणं
अदर्शनाभावादेव बंधाभावः सो मोक्ष इति। दर्शनस्य भावे बंधकारणस्यादर्शनस्य
नाश इति अतो दर्शनं ज्ञानं कैवल्यकारणमुक्तं। किं चेदमदर्शनं नाम। किं गुणा
नामधिकारः। आहोस्वित् दृशिरूपस्य स्वामिनः दर्शितविषयस्य प्रधानचित्तस्या
नुत्पादः। अस्मिन् दृश्ये विद्यमाने यो दर्शनाभावः। किमर्थवत्ता गुणानां। अथाविद्या स्वचित् घा
तेन सह निरुद्धा स्वचित्तस्योत्पत्तिबीजं। किं स्थितिसंस्कारक्षये गतिसंस्काराभिव्यक्तिः।
यत्रेदमुक्तं। प्रधानं स्थित्यैव वर्त्तमानं विकाराकरणात् अप्रधानं स्यात्। तथा गत्यैव व
र्तमानं विकारनित्यत्वादप्रधानं स्यात्। उभयथा चास्य वृत्तिः प्रधानव्यवहारं लभ
ते नान्यथा। कारणांतरेष्वपि कल्पितेष्वेव समानश्चर्चः। दर्शनशक्तिरेवादर्श

नमित्येके।प्रधानस्यात्मख्यापनार्था यप्रवृत्तिरिति श्रुतेः।सर्वबोध्यबोधनस
मर्थः प्राक्प्रवृत्तेः पुरुषो न पश्यति।सर्वकार्यकारणसमर्थं दृश्यं तदा न दृश्यत
इति।उभयस्याप्यदर्शनं धर्म इत्येके।तत्रेदं दृश्यस्य स्वात्मभूतमपि पुरुषप्रत्यय
मपेक्ष्य दर्शनं दृश्यधर्मत्वेन भवति।तथा पुरुषस्यानात्मभूतमपि दृश्यप्रत्ययम
पेक्ष्य पुरुषधर्मत्वेनेवादर्शनमवभासते।दर्शनं ज्ञानमेवादर्शनमिति केचिदभिद
धतीत्येते शास्त्रगता विकल्पाः।तत्र विकल्पबहुत्वमेतत्सर्वपुरुषाणां गुणसंयो
गे साधारणविषयं।यस्तु प्रत्यक्चेतनस्य स्वबुद्धिसंयोगः।२४ तस्य हेतुरविद्या॥ विप
र्यज्ञानवासनेत्यर्थः।विपर्ययज्ञानवासनावासिता न कार्यनिष्ठां पुरुषख्यातिं बुद्धिः प्रा
प्नोति।साधिकारा पुनरावर्त्तते।अत्र कश्चित्पंडकोपाख्यानेनोद्घाटयति।मुग्ध
या भार्ययाभिधीयते पंडक आर्यपुत्र अपत्यवती मे भगिनी किमर्थं नाहमिति॥

सतामाह । म्रतस्तेहमपात्यमुत्पादयिष्यामीति । तथेदं विद्यमानं ज्ञानं चित्तनिवृत्तिं नकरो
ति विनिष्टं करिष्यतीति काशा । तत्राचार्यदेशीयो वक्ति । ननु बुद्धिनिवृत्तिरेव मोक्षो ऽद
र्शनकारणाभावात् बुद्धिनिवृत्ति ॥ तच्चादर्शनं बंधकारणं दर्शनान्निवर्त्तते तत्र चित्त
निवृत्तिरेव मोक्षः । किमर्थमस्थाने एवास्य मतिविभ्रमः । हेयं दुःखं हेयकारणं च संयोगा ये ४
ख्यं सनिमित्तमुक्तं । अतः परं हानं वक्तव्यं ।२५ तदभावात्संयोगाभावो हानं तद्दृशेः
कैवल्यं । तस्याऽदर्शनस्याभावात् बुद्धिपुरुषसंयोगाभाव आत्यंतिको बंधनोपरम इत्यर्थः ।
एतद्धानं तद्दृशेः कैवल्यं पुरुषस्यामिश्रीभावः । पुनरसंयोगो गुणैरित्यर्थः । दुःखका
रणनिवृत्तौ दुःखोपरमो हानं तदा स्वरूपप्रतिष्ठः पुरुष इत्युक्तं । अथ हानस्य कः प्राप्त्युप
भ्य इति ।२६। विवेकख्यातिरविप्लवा हानोपायः । सत्त्वपुरुषान्यताप्रत्ययो विवेकख्यातिः ।
सा त्वनिवृत्तमिथ्याज्ञाना प्लवते । यदा मिथ्याज्ञानं दग्धबीजभाववंध्यप्रसवं संप
द्यते । तदा विधूतक्लेशरजसः सत्त्वस्य परे वैशारद्ये परस्यां वशीकारसंज्ञायां वर्त्त

मानस्य प्रत्ययविवेकप्रवाहो निर्मलो भवति। सा विवेकख्यातिरविप्लवा हानस्यो
पायः। ततो मिथ्याज्ञानस्य दग्धबीजाभावोपगमः पुनश्चाप्रसव इत्येष मोक्षस्य मार्गो
हानस्योपाय इति॥२६ तस्य सप्तधा प्रांतभूमिः प्रज्ञा। तस्येति प्रत्युदितख्यातेः प्रत्या
म्नाय सप्तधेति। अशुद्ध्यावरणमलापगमात् चित्तस्य प्रत्ययांतरानुत्पादे सति सप्त
प्रकारैव प्रज्ञा विवेकिनो भवति। तद्यथा। परिज्ञातं हेयं नास्य पुनः परिज्ञेयमस्ति।
क्षीणा हेयहेतवो न पुनरेतेषां क्षेतव्यमस्ति। साक्षात्कृतं निरोधसमाधिना हानं। भावि
तो विवेकख्यातिरूपो हानोपाय इत्येषा चतुष्टयी कार्या विमुक्तिः प्रज्ञायाः। चित्तमुक्तिस्तु
त्रयी चरिताधिकारा बु- गुणा गिरिशिखरकूटच्युता इव ग्रावाणो निरवस्थानाः
स्वकारणे प्रलयाभिमुखाः सह तेनास्तं गच्छंति। न चैषां विलीनानां पुनरस्त्युत्पत्ति
ः प्रयोजनाभावादिति। एतस्यामवस्थायां गुणसंबंधातीतः स्वरूपमात्रज्यो
तिरमलः केवली पुरुष इत्येतां सप्तविधां प्रांतभूमिप्रज्ञामनुपश्यन् पुरु

पा॰यो॰
२८

षकुशल इत्याख्यायते। प्रतिप्रसवेपि च चित्तस्य मुक्त कुशल इत्येव भवति गु
णातीतत्वादिति। सिद्धा भवति विवेकख्यातिर्हानोपाय इति। न च सिद्धिमन्तरेण
साधनमित्येतदारभ्यते। २८। योगांगानुष्ठानादशुद्धिक्षये ज्ञानदीप्तिराविवेक
ख्यातेः। योगांगान्यष्टावभिधास्यमानानि तेषामनुष्ठानात्पंचपर्वणो विपर्ययस्या
शुद्धिरूपस्य क्षयो नाशः। तत्क्षये सम्यग्ज्ञानस्याभिव्यक्तिः। यथा यथा च साध
नान्यनुष्ठीयंते तथा तथा तनुत्वमशुद्धिरापद्यते यथा यथा च क्षीयते त
था तथा च क्षयक्रमानुरोधिनी ज्ञानस्यापि दीप्तिर्विवर्धते। सा खल्वेषा विवृद्धिः
प्रकर्षमनुभवति आविवेकख्यातेः। आपुरुषस्वरूपविज्ञानादित्यर्थः। योगां
गानुष्ठानमशुद्धेर्वियोगकारणं। यथा परशुश्छेद्यस्य। विवेकख्यातेस्तु
प्राप्तिकारणं। यथा धर्मः सुखस्य नान्यथा कारणं। कति चैतानि कारणा

निशास्ते भवंति न वैवेत्याह। तद्यथा। उत्पत्तिस्थित्यभिव्यक्तिविकारप्रत्ययाप्तयः। वियो
गान्यत्वधृतयः कारणं नवधा स्मृतमिति। तत्रोत्पत्तिकारणं मनो भवति ज्ञानस्य। स्थि
तिकारणं मनसः पुरुषार्थता। शरीरस्येवाहार इति। अभिव्यक्तिकारणं रूपस्यालोक
विकाराकारकारणं मनसो विषयांतरं॥ यथाग्निः पाक्यस्य। प्रत्ययकारणं धूम
ज्ञानमग्निज्ञानस्य। प्राप्ति योगांगानुष्ठानं विवेकख्यातेः॥ वियोगकारणं तदेवा
शुद्धेः। अन्यत्वकारणं यथा सुवर्णस्य सुवर्णकारः। एवमेकस्त्रीप्रत्ययस्य अविद्या
मूढत्वे द्वेषो दुःखत्वे॥ रागः सुखत्वे तिज्ञानं माध्यस्थ्ये। धृतिकारणं शरीरमिंद्रिया
णां। तानि च तस्य। महाभूतानि शरीराणां। तानि च परस्परं सर्वेषां तैर्यग्यौनमानु
ष दैवतानि च परस्परार्थत्वादित्येवं नवकारणानि। तानि च यथासंभवं पदांत
यो रेष्वपि योज्यानि। योगांगानुष्ठानं तु द्विधैव कारणत्वं लभत इति तत्र योगांगान्यवधार्यं
ते। यमनियमासनप्राणायामप्रत्याहारधारण

पा॰यो॰

३०

30

ध्यानसमाधयोऽष्टांगानि । यथाक्रममेषामनुष्ठानं स्वरूपं च वक्ष्यामः ॥२९॥ तत्रा-

हिंसासत्यास्तेयब्रह्मचर्यापरिग्रहा यमाः । तत्राहिंसा सर्वथा सर्वदा सर्वभूताना-

मनभिद्रोहः । उत्तरे यमनियमास्तन्मूलास्तत्सिद्धिपरतयैव तत्प्रतिपादना-

प्रति यप्राद्यंते । तदवदातरूपकरणायैवोपादीयंते । तथा चोक्तं । स खल्वयं ब्राह्म-

णो यथा यथा व्रतानि बहूनि समादित्सते तथा तथा प्रमादकृतेभ्यो हिंसानिदानेभ्यो नि

निवर्त्तमानस्तामेवावदातरूपामहिंसां करोति । सत्यं । यथार्थे वाङ्मनसी । यथा

दृष्टं यथानुमितं यथाश्रुतं तथा वाङ्मनश्चेति । परत्र स्वबोधसंक्रान्तये वागुक्ता सा यदि

न वंचिता भ्रांता वा प्रतिपत्तिवन्ध्या वा भवेत् । इत्येषा सर्वभूतोपकारार्थं प्रवृत्ता न

भूतोपघाताय । यदि चैवमप्यभिधीयमाना भूतोपघातपरैव स्यात् न सत्यं भ

वेत्पापमेव भवेत् । तेन पुण्याभासेन पुण्यप्रतिरूपकेन कष्टं तमः प्राप्नुयात् तस्मात्प
रीक्ष्य सर्वभूतहितं सत्यं ब्रूयात् । स्तेयमशास्त्रपूर्वकं द्रव्याणां परतः स्वीकरणं ॥ तत्प्र
तिषेधः पुनरस्पृहारूपमस्तेयमिति । ब्रह्मचर्यं । गुप्तेंद्रियस्योपस्थस्य संयमः । विष
याणामर्जनरक्षणक्षयसंगहिंसादोषदर्शनादस्वीकरणमपरिग्रह इत्येते यमास्तेतु ।३०।
जातिदेशकालसमयानवच्छिन्नाः सार्वभौमा महाव्रतं । तत्राहिंसा जात्यवच्छिन्ना
मत्स्यबंधकस्य मत्स्ये वनान्यत्र हिंसा । देशावच्छिन्ना न तीर्थे हनिष्यामीति । सैव का
लावच्छिन्ना न चतुर्दश्यां न पुण्येऽहनीति । सैव त्रिभिरुपरतस्य समयावच्छिन्ना देवब्रा
ह्मणार्थे नान्यथा हनिष्यामीति । यथा क्षत्रियाणां युद्ध एव हिंसा नान्यत्रेति । एभिर्जाति
देशकालसमयैरनवच्छिन्ना अहिंसादयः सर्वथैव परिपालनीयाः । सर्वभूमिषु सर्वविष

येषुसर्वेष्वेवाविदितव्यभिचाराः। सार्वभौमामहाव्रतमित्युच्यंते ॥३१॥ शौचसंतो
षतपःस्वाध्यायेश्वरप्रणीधानानिनियमाः। तत्रशौचंमृज्जलादिजनितंमेध्याभ्य
वहारणादिचबाह्यं। आभ्यंतरंचित्तमलानामाक्षालनंसंतोषः। संनिहितसाधना
दधिकस्यानुपादित्सा। तपोद्वंद्वसहनं। द्वंद्वंचजिघत्सापिपासे। शीतोष्णे।
स्थानासने। काष्ठमौनाकारमौनेच। व्रतानिचैषांयथायोगंकृछ्रचांद्रायणसांतपना
दीनि। स्वाध्यायोमोक्षशास्त्राणामध्ययनं। प्रणवजपोवा। ईश्वरप्रणीधानं
तस्मिन्परमगुरौसर्वकर्मार्पणं। शय्यासनस्थोथपथिव्रजन्वास्वस्थःपरिक्षीणवितर्क
जालः संसारबीजक्षयमीक्षमाणः स्यान्नित्यमुक्तोऽमृतभोगभागी। यत्रेदमुक्तं।
ततःप्रत्यक्चेतनाधिगमोप्यंतरायाभावश्चेति। एतेषांयमनियमानां ॥३२॥ वितर्कबाध

प्रतिपक्षभावनं । यदास्य ब्राह्मणस्य हिंसादयो वितर्का जायेरन् हनिष्याम्यहमपकारि
णमनृतमपि वक्ष्यामि । द्रव्यमप्यस्य स्वीकरिष्यामि । दारेषु चास्य व्यवायी भविष्यामि
३ परिग्रहेषु चास्य स्वामी भविष्यामीति । एवमुन्मार्गप्रवणवितर्कज्वरेणातिदीप्तेन बाध्य
मानस्तत्प्रतिपक्षान्भावयेत् । घोरेषु संसाराङ्गारेषु पच्यमानेन मया शरणमुपागतः
सर्वभूताभयप्रदानेन योगधर्मः । स खल्वहं त्यक्त्वा वितर्कान् पुनस्तानाददानस्तु
ल्यः श्ववृत्तेनेति भावयेत् यथा श्वा वान्तावलेही तथा त्यक्तस्य पुनराददान इति । एव
मादि सूत्रान्तरेष्वपि योज्यं ॥ ३३ ॥ वितर्का हिंसादयः कृतकारितानुमोदिताः लोभक्रोधमो
हपूर्वका मृदुमध्याधिमात्रा दुःखाज्ञानानन्तफला इति प्रतिपक्षभावनं । तत्र हिंसा ता
वत् । कृता कारितानुमोदितेति त्रिधा । एकैका पुनस्त्रिधा । लोभेन मांसचर्मार्थेन ।
क्रोधेनापकृतमनेनेति । मोहेन धर्मो मे भविष्यतीति । लोभक्रोधमोहाः पुनस्त्रिधा मृदुमध्याधिमात्रा इत्येवं सप्तविंशतिर्भेदा
भवन्ति हिंसायाः । मृदुमध्याधिमात्राः पुनस्त्रिधा मृदुमृदुर्मध्यमृदुस्तीव्रमृदुरिति तथा मृदुमध्यो मध्यमध्यस्तीव्रमध्य इति तथा

हिंसां स्वेयत्वादिति । एवमनृतादिष्वपि योज्यं । ते खल्वमी वितर्काः दुःखाज्ञानानंतफला
इति प्रतिपक्षभावनं । दुःखमज्ञानं चानंतं फलं येषामिति प्रतिपक्षभावनं । तथा च हिंस
कः प्रथमं तावत् वध्यस्य वीर्यमाक्षिपति । ततश्च शस्त्रादिनिपातेन दुःखयति । ततो जी
वितादपि मोचयतीति । ततो वीर्याक्षेपादस्य चेतनाचेतनमुपकरणं क्षीणवीर्यं भवति
दुःखोत्पादान्नरकतिर्यक्प्रेतादिषु दुःखमनुभवति । जीवितव्यपरोपणात् प्रतिक्ष
णं च जीवितात्यये वर्तमानो मरणमिच्छन्नपि दुःखविपाकस्य नियतवेदनीयत्वात्
कथं देवोस्वसिति । यदि च कथंचित् पुण्यावापगता हिंसा भवेत् तत्र सुखप्राप्तौ भवे
दल्पायुरिति एवमनृतादिष्वपि योज्यं यथासंभवं । एवं वितर्काणां चामुमेवानुगतं
विपाकमनिष्टं भावयन्न वितर्केषु मनः प्रणिदधीत । प्रतिपक्षभावनाहेतोर्हेया वित

पा॰यो॰

३५ कौ यदास्युरप्रसवधर्माणस्तदा तत्कृतमैश्वर्यं योगिनः सिद्धिसूचनं भवति। तद्यथा। अ
हिंसाप्रतिष्ठायां तत्सन्निधौ वैरत्यागः। सर्वप्राणिनां भवति। सत्यप्रतिष्ठायां क्रियाफला
३७ श्रयत्वं। धार्मिको भूया इति भवति धार्मिकः स्वर्गं प्राप्नुहि इति स्वर्गं प्राप्नोति। अमोघास्य
वाग्भवति। अस्तेयप्रतिष्ठायां सर्वरत्नोपस्थानं। सर्वदिक्स्थान्यस्योपतिष्ठंते रत्नानि। ब्र
ह्मचर्यप्रतिष्ठायां वीर्यलाभः। यस्य लाभादप्रतिघान् गुणानुत्कर्षयति सिद्धश्च विनयेषु
९ ज्ञानमाधातुं समर्थो भवतीति। अपरिग्रहस्थैर्ये जन्मकथंतासंबोधः। अस्य भवति। कोऽहमा
सं कथमहमासं। किंस्विदिदं कथंस्विदिदं। के वा भविष्यामः कथं भविष्याम इत्येवमस्य
पूर्वांतपरांतमध्येष्वात्मभावजिज्ञासा स्वरूपेणोपावर्त्तते। एता यमस्थैर्ये सिद्धयो निय
मेषु वक्ष्यामः। ३५।। शौचात्स्वांगजुगुप्सा परैरसंसर्गः। स्वांगे जुगुप्सायां शौच

˟ तृष्णाक्षयसुखस्यैते नार्हतः षोडशीं कलामिति ।४२। कायेन्द्रियसिद्धिरशुद्धिक्षयात्तपसः ।४३। निर्वर्त्यमानमेव ॥
खे

मारभमाणः कायावद्यदर्शी कायानभिष्वंगी यतिर्भवति । किंच परैरसंसर्गः । काय
स्वभावावलोकी स्वमपि कायं जिहासुर्मृज्जलादिभिराक्षालयन्नपि कायशुद्धिमप
श्यन्कथं परकायैरत्यन्तमेवाप्रयतैः संसृज्येत । किंच । सत्त्वशुद्धिसौमनस्यैकाग्र्यें
द्रियजयात्मदर्शनयोग्यत्वानि च । भवन्तीति वाक्यशेषः । शुचेः सत्त्वशुद्धिः । त
तः सौमनस्यं । तत ऐकाग्र्यं । तत इंद्रियजयः । ततश्चात्मदर्शनयोग्यत्वं बुद्धिस
त्वस्य भवतीति । एतच्छौचस्थैर्यादधिगम्यत इति ।४१। संतोषादनुत्तमः सुख ८
लाभः । तथा चोक्तं । यच्च कामसुखं लोके यच्च दिव्यं महत्सुखं ˟ तपो हिनस्त्यशुद्ध्या
वरणमलं । तदावरणमलापगमात्कायसिद्धिरणिमाद्या । तथेन्द्रियसिद्धिर्दू

पा॰यो॰

देवा

३ तत्त्वचणमननाद्येति।३८। स्वाध्यायादिष्टदेवतासंप्रयोगः। देवता

श्चायस्तपस्येतेनाईतः षोडशीं कलामिति।३९। कायेंद्रियसिद्धिरशुद्धिक्षया

३४ त्तपसः। [illegible] ऋषयः सिद्धाश्च। स्वाध्यायशीलस्य दर्शनं ग

च्छंति कार्ये चास्य वर्त्तंत इति।४०। समाधिसिद्धिरीश्वरप्रणिधानात्।ईश्व

रार्पित सर्वभावस्य समाधेः सिद्धिः। यथा सर्वमीप्सितमवितथं जानाति

देशांतरे देहांतरे कालांतरे च ततोऽस्य प्रज्ञा यथा भूतं प्रजानातीति

उक्ताः सहसिद्धिभिर्यमनियमाः। आसनादीनि वक्ष्यामः।४१।

तत्रास्थिरसुखमासनं । तद्यथा । पद्मासनं । वीरासनं । भद्रासनं । स्वस्तिकं । दंडासनं ।
सोपाश्रयं । पर्यंकं । क्रौंचनिषदनं । हस्तिनिषदनं । उष्ट्रनिषदनं । समसंस्थानं स्थिरसु
खं यथासुखं चेत्येवमादि । प्रयत्नशैथिल्यानंतसमापत्तिभ्यां भवतीति वाक्यशेषः । प्र
यत्नोपरमात सिद्ध्यत्यासनं । येनांगमेजयो भवति । एवं तेवा समापन्नं चित्तमा
सनं निवर्त्तयतीति ॥४२॥ ततो द्वंद्वानभिघातः । शीतोष्णादिभिर्द्वंद्वैरासनजयान्नाभि
भूयते । तस्मिन्सति श्वासप्रश्वासयोर्गतिविच्छेदः प्राणायामः । सत्यासनेवाह्यस्य वा
योराचमनं श्वासः । कोष्ठस्य वायोर्निःसरणं प्रश्वासः । तयोर्गतिविच्छेद उभयाभावः
प्राणायामः । सतु ।४५। वाह्याभ्यंतरस्तंभवृत्तिर्देशकालसंख्याभिः परिदृष्टो दीर्घ
सूक्ष्मः । यत्र श्वासपूर्वको गत्यभावः स वाह्यः । तत्र श्वासपूर्वको गत्यभावः स आभ्यंतरः

स्तृतीयस्तंभवृत्तिर्यत्रोभयाभावः सकृत्प्रयत्नाद्भवति । यथा तप्तेन्यस्तमुपले जलं सर्व
तः संकोचमापद्यते । यथा द्वयोर्युगपत्नभवत्यभाव इति । त्रयोप्येते देशेन परि
दृष्टा इयानस्य विषयो देश इति । कालेन परिदृष्टाः क्षणानामियत्तावधारणेनावच्छिन्ना
इत्यर्थः । संख्याभिः परिदृष्टा एतावद्भिः श्वासप्रश्वासैः प्रथम उद्घातः । तद्वन्निगृहीतस्यै
तावद्भिर्द्वितीय उद्घातः । एवं तृतीयः । एवं मृदुः । एवं मध्यः । एवं तीव्र इति संख्यापरिदृष्टः
स खल्वयमेवमभ्यस्तो दीर्घसूक्ष्मः ॥४६ । बाह्याभ्यंतरविषयाक्षेपी चतुर्थः ॥ देशकाल
लसंख्याभिर्बाह्यविषयपरिदृष्ट आक्षिप्तः । तथाभ्यंतरविषयपरिदृष्ट आक्षिप्तः । उ
भयथा दीर्घसूक्ष्मस्तत्पूर्वको भूमिजयात्क्रमेणोभयोर्गत्यभावश्चतुर्थः प्रा
णायामस्तृतीयस्तु विषयानालोचितो गत्यभावः । सकृदारब्ध एव देशका

स्संख्याभिः परिदृष्टो दीर्घसूक्ष्मः॥ चतुर्थस्तु बाह्याभ्यन्तरयोर्विषययोरवधारणात् क्रमेण
भूमिजयात् उभयापेक्षः पूर्वको गत्यभावस्तुर्थः प्राणायाम इत्ययं विशेष इति।४७॥ ततः
क्षीयते प्रकाशावरणं। प्राणायामानभ्यस्यतोऽस्य योगिनः क्षीयते विवेकज्ञानावरणीयं कर्म।
यत्तदाचक्षते महामोहमयेनेन्द्रजालेन प्रकाशशीलं सत्वमावृत्य तदेवाकार्ये नियुङ्क्त इति।
तदस्य प्रकाशावरणं कर्म संसारनिबंधनं प्राणायामाभ्यासाद्दुर्वलं भवति प्रतिक्षणं च
क्षीयते। तथाचोक्तं। तपो न परं प्राणायामात् ततो विशुद्धिर्मलानां दीप्तिश्च ज्ञानस्येति
किंच धारणासु च योग्यता मनसः। प्राणायामाभ्यासादेव। प्रच्छर्दनविधारणाभ्यां वा प्राण
स्येति वचनात्।४९। कः प्रत्याहारः। स्वविषयासंप्रयोगे चित्तस्य स्वरूपाकार इवे
न्द्रियाणां प्रत्याहारः। स्वविषयसंप्रयोगाभावे चित्तस्वरूपानुकार इवेति चित्तनिरोधे चि

तवाविरुद्धानींद्रियाणीति तेनेंद्रियजयवदुपायांतरमपेक्षते यथा मधुकरराजं मक्षि
का उत्पतंतमनूत्पतंति निविशमानमनुविशंति । तथैंद्रियाणि चित्तनिरोधे निरुद्धानि इत्य
यंप्रत्याहारः ततः परमावश्यतेंद्रियाणां । शब्दादिष्वव्यसनमिंद्रियजय इति । केचित् । सक्तिर्व्यस
नं व्यस्यत्येनं श्रेयस इति । अविरुद्धप्रतिपत्तिर्न्याय्या शब्दादिसंप्रयोगः स्वेच्छयेत्यन्ये । राग
द्वेषाभावे सुखदुःखशून्यं शब्दादिज्ञानमिंद्रियजय इति केचित् । चित्तैकाग्र्यादप्रतिपत्ति
रेवेति जैगीषव्यः । ततः परमा त्वियं वश्यता यच्चित्तनिरोधे निरुद्धानींद्रियाणि नेतरेंद्रियज
यवत् प्रयत्नमुपायांतरमपेक्षंते योगिन इति ॥ ॥ इति पातंजले साधननिर्देशो नाम द्वितीयः
यः पादः ॥२॥ ॥ उक्तानि बहिरंगानि साधनानि धारणा वक्तव्या ॥ देशबंधश्चित्तस्य धा
रणा । नाभिचक्रे हृदयपुंडरीके मूर्ध्नि ज्योतिषि नासिकाग्रे जिह्वाग्र इत्येवमादिषु देशे
षु बाह्ये वा विषये चित्तस्य वृत्तिमात्रेण बंध इति धारणा । तत्र प्रत्ययैकतानता ध्यानं

तस्मिन्देशे ध्येयालंबनस्य प्रत्ययस्य एकतानता सदृशः प्रवाहः प्रत्ययांतरेणापरामृष्टो ध्यानं।
तदेवार्थमात्रनिर्भासं स्वरूपशून्यमिव समाधिः। ध्यानमेव ध्येयाकारनिर्भासं प्रत्ययात्मकेन स्व
रूपेण शून्यमिव यदा भवति ध्येयस्वभावावेशात्तदा समाधिरित्युच्यते।३। त्रयमेकत्र संयमः। मनः त्र
तद्धारणा[illegible]ध्यानसमाधित्रयमेकत्र संयमः। एकविषयाणि त्रीणि[illegible]णि साधनानि संयमइत्यु
च्यते। तदस्य त्रयस्य तांत्रिकी परिभाषा संयम इति। तज्जयात्प्रज्ञालोकः। तस्य संयमस्य जया
त् समाधिप्रज्ञाया भवत्यालोको यथायथा संयमः स्थिरपदो भवति तथातथा समाधिप्रज्ञा वि-
शारदा भवति॥ तस्य भूमिषु विनियोगः। तस्य संयमस्य जितभूमेर्याऽनंतरा भूमिस्तत्र विनि
योगः। नह्यजिताधरभूमिः अनंतरभूमिं विलंघ्य प्रांतभूमिषु संयमं लभते। तदभावाच्च
कुतस्तस्य प्रज्ञालोकः। जितोत्तरभूमिकस्य चनाधरभूमिषु परचित्तज्ञानादिषु संयमो युक्तः। क
स्मात्तदर्थस्य अन्यथैवावगतत्वात्। भूमेरस्या इयमनंतरा भूमिः इत्यत्र योग एवोपाध्यायः।

कथमेवं ह्युक्तं । योगेन योगो ज्ञातव्यो योगो योगात्प्रवर्त्तते । योऽप्रमत्तस्तु योगेन स योगे रमते
चिरमिति । ६ । त्रयमंतरंगं पूर्वेभ्यः । तदेतद्धारणाध्यानसमाधित्रयमंतरंगं संप्रज्ञातस्य समा
ए धेः पूर्वेभ्यो यमादिभ्यः पंचभ्यः साधनेभ्य इति । ७ । तदपि बहिरंगं निर्बीजस्य । तदप्यंतरंगं साधन
३४ त्रयं निर्बीजस्य योगस्य बहिरंगं भवति । कस्मात्तदभावे भावादिति । अथ निरोधचित्तक्षणेषु चलं
गुणवृत्तमिति कीदृशस्तदा चित्तपरिणामः ॥ ८ ॥ व्युत्थान[निरोध]संस्कारयोरभिभवप्रादुर्भावौ निरो निरोध
धक्षणचित्तान्वयो निरोधपरिणामः ॥ व्युत्थानसंस्काराश्चित्तधर्मा न ते प्रत्ययात्मका इति प्रत्य
यनिरोधे न निरुद्धा । निरोधसंस्कारा अपि चित्तधर्मास्तयोरभिभवप्रादुर्भावौ व्युत्थानसंस्का
रा हीयंते निरोधसंस्कारा आधीयंते निरोधक्षणं चित्तमन्वेति । तदेकस्य चित्तस्य प्रतिक्षणमि
दं संस्कारान्यथात्वं निरोधपरिणामः तदा संस्कारशेषं चित्तमिति निरोधसमाधौ व्याख्यातं । ।
तस्य प्रशांतवाहिता संस्कारात् । निरोधसंस्कारपाटवाभ्यासापेक्षया प्रशांतवाहिता चित्तस्य
भवति । तत्संस्कारमांद्ये व्युत्थानधर्मिणा संस्कारेण निरोधधर्मः संस्कारोऽभि

ष्यत इति । सर्वार्थतैकाग्रतयो क्षयोदयौ चित्तस्य समाधिपरिणामः । सर्वार्थता चि
त्तधर्मः एकाग्रतापि चित्तधर्मः । सर्वार्थतायाः क्षयः तिरोभाव इत्यर्थः । एकाग्रताया
उदयः प्रादुर्भावः । तयोर्धर्मित्वेनानुगतं चित्तं । तदिदं चित्तमपायोपजननयोः स्वात्मभूतयोर्ध
र्मयोरनुगतं समाधीयते स चित्तस्य समाधिपरिणामः ॥ ११ ॥ ततः पुनः शान्तोदितौ तुल्यप्र
त्ययौ चित्तस्यैकाग्रतापरिणामः ॥ समाहितचित्तस्य पूर्वः प्रत्ययः शान्त उत्तरस्तत्सदृश उ
दितः । समाधिचित्तमुभयोरनुगतं पुनस्तथैवासमाधिभ्रेषादिति । स खल्वयं धर्मिण
श्चित्तस्य एकाग्रतापरिणामः । १२ । एतेन भूतेन्द्रियेषु धर्मलक्षणावस्थापरिणामा व्याख्या
ताः । एतेन पूर्वोक्तेन चित्तपरिणामेन धर्मलक्षणावस्थारूपेण भूतेन्द्रियेषु धर्मपरिणामोव
स्थापरिणामश्चोक्तो वेदितव्यः । तत्र व्युत्थाननिरोधयोर्धर्मयोरभिभवप्रादुर्भावौ धर्मि
णि धर्मपरिणामो लक्षणपरिणामश्च । निरोधस्त्रिलक्षणः । त्रिभिरध्वभिर्युक्तः । ल

सखल्वनागतलक्षणमध्वानं प्रथमं हित्वा धर्मनतिक्रांतो वर्त्तमानं लक्षणं प्रतिपन्नः। यत्रास्य
स्वरूपेणाभिव्यक्तिरेषोऽस्य द्वितीयोऽध्वा। नचातीतानागताभ्यां लक्षणाभ्यां वियुक्तः। व्यु
त्थानंत्रिलक्षणं। त्रिभिरध्वभिर्युक्तं। वर्त्तमानंलक्षणं हित्वा धर्मत्वमनतिक्रांतं अतीतल
क्षणंप्रतिपन्नं एषोऽस्य तृतीयोऽध्वा। नचानागतवर्त्तमानाभ्यां लक्षणाभ्यां वियुक्तं। एवंपु
र्व्युत्थानमुपसंपद्यमानमनागतंलक्षणं हित्वा धर्मत्वमनतिक्रांतंवर्त्तमानंलक्षणं प्रतिपन्नं।
यत्रास्य स्वरूपाभिव्यक्तौ सत्यां व्यापारः। एषोऽस्य द्वितीयोऽध्वा। नचातीतानागताभ्यां
लक्षणाभ्यां वियुक्तं। इत्येवं पुनर्निरोध एवं पुनर्व्युत्थानमिति। तथावस्थापरिणामः। निरो
धलक्षणेषु निरोधसंस्काराबलवंतो भवंति। दुर्वला व्युत्थानसंस्कारा इति। एषधर्मा
णामवस्थापरिणामः। तत्र धर्मिणो धर्मैः परिणामो धर्माणां त्र्यध्वनां लक्षणैः प
रिणामो लक्षणानामप्यवस्थाभिः परिणाम इत्येवं धर्मलक्षणावस्थापरिणामैः शू

न्वं लक्षणमपि गुणवृत्तम तिष्ठते। चलं च गुणवृत्तं। गुणस्वाभाव्यं तु प्रवृत्तिकारणमुक्तं
गुणानामिति। एतेन भूतेंद्रियेषु धर्मधर्मिभेदात् त्रिविधः परिणामो वेदितव्यः। प
रमार्थतस्त्वेक एव परिणामो धर्मिस्वरूपमात्रो हि धर्मो धर्मिविक्रियैवैषा धर्मद्वा
रा प्रपंच्यत इति। तत्र धर्मस्य धर्मिणि वर्तमानस्याध्वस्वतीतानागतवर्तमानेषु भावा
न्यथात्वं भवति न द्रव्यान्यथात्वं। यथा सुवर्णभाजनस्य भित्त्वान्यथाक्रियमाणस्य भावा
न्यथात्वं भवति न सुवर्णान्यथात्वमिति। अपर आह। धर्मानभ्यधिको धर्मी पूर्वतत्त्वम
तिक्रमेत्। पूर्वापरावस्थाभेदमनुपतितः कौटस्थ्येन विपरिवर्तेत यद्यन्वयी स्यादित्य
यमदोषः। कस्मादेकांततानभ्युपगमात्। तदेतत् त्रैलोक्यं व्यक्तेरपैति नित्यत्वप्रति
षेधादपेतमप्यस्ति विनाशप्रतिषेधात्। संसर्गाच्चास्य सौक्ष्म्यं सौक्ष्म्याच्चानुपलब्धिरिति

पा॰चो॰

३९ लक्षणपरिणामश्च धर्मोऽध्वसु वर्त्तमानोऽतीतोऽतीतलक्षणयुक्तो नागतवर्त्तमानाभ्यां लक्षणाभ्यां
मवियुक्तः वर्त्तमानो वर्त्तमानलक्षणयुक्तः ऽतीतानागताभ्यां लक्षणाभ्यामवियुक्तः यथानागतो
३१ नागतलक्षणयुक्तो वर्त्तमानातीताभ्यां लक्षणाभ्यामवियुक्त इति। यथा पुरुष एकस्यां स्त्रियां रक्तो न
शेषासु विरक्तो भवतीति। अत्र लक्षणपरिणामे सर्वस्य लक्षणयोगादध्वसंकरः प्राप्नोतीति
परैर्दोषश्चोद्यत इति। तस्य परिहारः। धर्माणां धर्मत्वमप्रसाध्यं सति धर्मत्वे लक्षण
भेदोऽपि वाच्यो न वर्त्तमानसमय एवास्य धर्मत्वं। एवं हि न चित्तं रागधर्मकं स्यात् क्रोधकाले
रागस्यासमुदाचारादिति। किंच त्रयाणां लक्षणानां युगपदेकस्यां व्यक्तौ नास्ति संभवः। क्रमे
८ ण स्वव्यंजकांजनस्य भवेद्भाव इति। उक्तंच। रूपातिशया वृत्त्यतिशयाश्च विरुध्यंते। सामान्यानि
त्वतिशयैः सह वर्त्तंते। तस्मादसंकरः। यथा नागस्यैव क्वचित्समुदाचार इति न तदानीमन्य
त्राभावः किंतु केवलं सामान्येन समन्वागत इति। अस्ति तदा तत्र तस्य भावः। तथा लक्षण

स्येति । न धर्मी त्र्यध्वा । धर्मास्तु त्र्यध्वानः । ते लक्षिता, अलक्षितास्तत्र लक्षितास्तामवस्थां प्रा
प्नुवन्तोऽन्यत्वेन प्रतिनिर्दिश्यन्ते । अवस्थान्तरतो न द्रव्यान्तरतः । यथैका रेखा शतस्थाने
शतं दशस्थाने दश । एका चैकस्थाने । यथैकत्वेपि स्त्री माता चोच्यते दुहिता च स्वसा
चेति । अवस्थापरिणामे कौटस्थप्रसंगदोषः कैश्चिदुक्तः । कथमध्वनो व्यापारेण व्य
वहितत्वात् । यदा धर्मः स्वव्यारं न करोति तदानागतः । यदा करोति तदा वर्तमानः । य
दा कृत्वा निवृत्तः तदातीत इत्येवं । धर्मधर्मिणोर्लक्षणानामवस्थानां कौटस्थं प्राप्नोती
ति दोष उच्यते । नासौ दोषः कस्मात् । गुणिनित्यत्वेपि गुणानां विमर्दवैचित्र्यात् । तथा
संस्थानमादिमत् धर्ममात्रं शब्दादीनां विनाश्यविनाशिनां । एवं लिंगमादिमद्ध
र्ममात्रं सत्वादीनां गुणानां विनाश्यविनाशिनां तस्मि विकारसंज्ञेति । तत्रोदाहरणं

मृद्धर्मी पिंडाकाराद्धर्माद्धर्मांतरमुपसंपद्यमानो धर्मतः परिणमते घटाकार इति
घटाकारोऽनागतं लक्षणं हित्वा वर्त्तमानं लक्षणं प्रतिपद्यत इति लक्षणतः परिणमते
घटः। नवपुराणतां प्रतिलक्षणमनुभवन्नवस्थापरिणामं प्रतिपद्यत इति। ~~लक्षणमवस्था~~
~~परिणमते~~ धर्मिणोऽपि धर्मांतरमवस्था धर्मस्यापि लक्षणांतरमवस्थेत्येक एव द्रव्यपरि
णामो भेदेनोपदर्शित इति। एवं पदार्थांतरेष्वपि योज्यमिति। त एते धर्मलक्षणाव
स्थापरिणामा धर्मिस्वरूपमनतिक्रांता इत्येक एव परिणामः सर्वानमून्विशेषा
नभिप्लवते। अथ को परिणामः। अवस्थितस्य द्रव्यस्य पूर्वधर्मनिवृत्तौ धर्मांतरोत्पत्तिः
परिणाम इति।१३। तत्र शांतोदिताव्यपदेश्यधर्मानुपाती धर्मी। योग्यतावच्छिन्ना धर्मिणः
शक्तिरेव धर्मः। स च फलप्रसवभेदानुमितः एकस्यान्योन्यश्च परिदृष्टः। तत्र वर्त्तमानः
स्वव्यापारमनुभवन्धर्मी धर्मांतरेभ्यः शांतेभ्यश्चाव्यपदेश्येभ्यश्च भिद्यते। यदा त

सामान्येन समन्वागतो भवति तदा स्वरूपमात्रत्वात् [illegible]सौ केन धर्मि द्योत । तत्र खलु धर्मि
णि धर्माः शांता उदिता अव्यपदेश्याश्चेति । तत्र शांता ये कृत्वा व्यापारमुपरताः सव्यापारा उदिताः
ते चानागतस्य लक्षणस्य समनंतरा वर्त्तमानस्यानंतरा अतीताः । किमर्थमतीतस्यानंतरा न
भवंत्येव वर्त्तमानाः पूर्वपश्चिमतानैवमतीतस्य । तस्मान्नातीतस्यास्ति समनंतरः । तस्माद
नागत एव समनंतरो भवति वर्त्तमानस्येति । अथाव्यपदेश्याः के सर्वं सर्वात्मकमिति । य
त्रोक्तं । जलभूम्योः पारिणामिकं रसादि वैश्वरूपं स्थावरेषु दृष्टं । तथा स्थावराणां जंगमेषु
जंगमानां स्थावरेषु इत्येवं जात्यनुच्छेदेन सर्वं सर्वात्मकं । देशकालाकारनिमित्तापवंधान्न
खलु समानकालमात्मनामभिव्यक्ति इति । य एतेष्वभिव्यक्तानभिव्यक्तेषु धर्मेष्वनुपाती
सामान्यविशेषात्मा सोऽन्वयी धर्मी । यस्य तु धर्ममात्रमेवेदं निरन्वयं तस्य भोगाभावः । क

पा॰यो॰

४१

41

स्मात् प्रत्यनुभवितान्तेन कृतस्य कर्मणोन्यत् कथं भोक्तृत्वेनाधि क्रियेत । तत्स्मृत्यभावप्र
नान्यदृष्टस्य स्मरणमन्यस्य[illegible]ति स्यास्तीति । वस्तुप्रत्यभिज्ञानाच्चावस्थितोन्वयी धर्मी
यो धर्मान्यथात्वमभ्युपगतः प्रत्यभिज्ञायते । कस्मान्नेदं धर्मिजंनिरन्वयमिति ।
१४ क्रमान्यत्वं परिणामान्यत्वे हेतुः ॥ एकस्य धर्मिण एक एव परिणाम इति प्रसक्ते क्र
मान्यत्वं परिणामान्यत्वे हेतुर्भवतीति । तद्यथा चूर्णमृत् पिंडमृत् घटमृत् कपा
लमृत् कणमृत् इति च क्रमः यो यस्य धर्मस्य समनंतरो धर्मः स तस्य धर्मः क्रमः
पिंडः प्रच्यवते घट उपजायते इति धर्मपरिणामक्रमः लक्षणपरिणामक्रमो घटस्या
नागतभावाद्वर्तमानभावक्रमः ॥ तथा पिंडस्य वर्तमानभावात् अतीतभावक्र
मः । नातीतस्यास्ति क्रमः । कस्मात् पूर्वपरतायां सत्यां समनंतरत्वं सा तु ना

स्यातीतस्य। तस्माद्द्वयोरेव लक्षणयोः क्रमः। तथावस्थापरिणामक्रमोऽपि। घटस्याभि
नवस्य प्रांते पुराणता दृश्यते। सा च क्षणपरंपरानुपातिना क्रमेणाभिव्यज्यमाना परां व्य
क्तिमापद्यत इति धर्मलक्षणाभ्यां च विशिष्टोयं तृतीयापरिणाम इति। त एते क्रमा
धर्मधर्मिभेदे सति प्रतिलब्धस्वरूपाः धर्मोपि धर्मी भवत्यन्यधर्मस्वरूपापेक्ष
येति। यदा तु परमार्थतो धर्मिण्यभेदोपचार द्वारेण स एवाभिधीयते धर्म
स्तदायमेकत्वेनैव क्रमः प्रत्यवभासते। चित्तस्य द्वये धर्माः परिदृष्टाश्चापरिदृष्टाश्च
तत्र प्रत्ययात्मकाः परिदृष्टा वस्तुमात्रा अपरिदृष्टाः। ते च सप्तैव भवंति। अनुमानेन
प्रापितवस्तुमात्रसद्भावाः। निरोधधर्मसंस्काराः परिणामोऽथ जीवनं। चेष्टा शक्ति
श्च चित्तस्य धर्मा दर्शनवर्जिताः। अतो योगिन उपात्तसर्वसाधनस्य बुभुत्सितार्
थप्रतिपत्तये संयमस्य विषय उपक्षिप्यते॥१५॥ परिणामत्रयसंयमादतीतानाग

पा॰ यो॰
४२

तज्ज्ञानं। धर्मलक्षणावस्थापरिणामेषु संयमाद्योगिनो भवत्यतीतानागतज्ञानं। धार
णाध्यानसमाधित्रयमेकत्र संयम उक्तः। तेन परिणामत्रयं साक्षात्क्रियमाणमतीतानाग
५२ तज्ञानं तेषु संपादयति ॥१६॥ शब्दार्थप्रत्ययानामितरेतराध्यासात्संकरस्तत्प्रविभा
गसंयमात्सर्वभूतरुतज्ञानं। तत्र वाग्वर्णेष्वेवार्थवती। श्रोत्रं च ध्वनिपरिणाममा
त्रविषयं। पदं पुनर्नादानुसंहारबुद्धिनिर्ग्राह्यमिति। वर्णा एकसमयासंभवित्वा
त्परस्परनिरनुग्रहात्मानस्ते पदमसंस्पृश्यानुपस्थाप्य, आविर्भूतास्तिरोभूताश्चे
ति प्रत्ये[redacted]कमपदस्वरूपा उच्यंते। वर्णः पुनरेकैकः पदात्मा सर्वाभिधान
शक्तिप्रचितः सहकारिवर्णांतरप्रतियोगित्वात्। वैश्वरूप्यमिवापन्नः। पूर्वश्चोत्तरे
णोत्तरश्च पूर्वेण विशेषेऽवस्थापित इत्येवं बहवो वर्णाः क्रमानुरोधिनोऽर्थसं
केतेनावच्छिन्नाः। इयंत एते सर्वाभिधानशक्तिपरिवृत्ता गकारौकारविसर्जनी

याः सास्नादिमंतमर्थं द्योतयंतीति । तदेतेषामर्थसंकेतेनावच्छिन्नानामनुसं
हृतध्वनिक्रमाणां य एको बुद्धिनिर्भासस्तत्पदं वाचकं वाच्यस्य संकेत्यते । तत्
देकं पदं एकबुद्धिविषयं एकप्रयत्नाक्षिप्तमभागमक्रममवर्णं बौद्धमंत्यवर्णप्रत्य
यव्यापारोपस्थापितं परत्र प्रतिपिपादयिषया वर्णैरेवाभिधीयमानैः श्रूयमानैः
श्रोतृभिः अनादिवाग्व्यवहारवासनानुविद्धया लोकबुद्ध्या सिद्धवत्संप्रतिप
त्त्या प्रतीयते । तस्य संकेतबुद्धितः प्रविभागः । एतावतामेवंजातीयकोऽनुसंहार ए
कस्यार्थस्य वाचक इति । क संकेतैस्तु पदपदार्थयोरितरेतराध्यासरूपः । स्मृत्या
त्मकः । योऽयं शब्दः सोऽयमर्थः योऽर्थः शब्द इति एवमितरेतराध्यासरूपः संकेतो
भवतीत्येवमेते शब्दार्थप्रत्यया इतरेतराध्यासात्संकीर्णाः । गौरिति शब्दो गौ

ना॰तो॰
४३
43

इत्यर्थो गौरिति ज्ञानं य एषां प्रविभागस्तः सर्वत्र विना सर्वपदेषु चास्ति वा एवोक्तिः।
ष्टत इत्युक्ते प्रस्तीति गम्यते तेन सत्तावदार्थो व्यभिचरतीति। तस्मान्नत्र साधना
क्रियास्तीति। पचतीत्युक्ते सर्वकारकाणामक्षेपो नियमार्थो नुवादः। कर्तृकरण
कर्मणां चैत्राग्नितंडुलानामिति। इदं च वाक्यार्थे पदरचनं। श्रोत्रियश्छंदोधीते
जीवति प्राणान्धारयति। तत्र वाक्ये पदपदार्थाभिव्यक्तिः ततः प्रविभज्य व्याकरणी
यं। क्रियावाचकं कारकवाचकं वा। अन्यथा भव[illegible]त्यस्योत्पादयइत्येवं नादिषु
नामाख्यातसारूप्यात्। आर्ति ज्ञानं कथं क्रियायां कारके वाव्याप्रियेतेति तेषां शब्दा
र्थे प्रत्ययानां प्रविभागः। तद्यथा। श्वेतते प्रासाद इति क्रियार्थः। श्वेतः प्रासाद
इति कारकार्थः। एवं क्रियाकारकात्मा तदर्थः प्रत्ययश्चकस्मात् सोयमित्यादि

सर्वं धात् एकार् एकपदत्वयः संकेत इति वस्तुस्थेतोर्थः स एव ह्यन्वययोरालंवनीभूतः।
सहि स्वाभिरेव स्वाभिव्यक्तिक्रियमाणेन शब्देन सहगतेन बुद्धिः सहगतः। एवं शब्द एवं प्रत्यये
नेतरेतर सहगत इति। अन्यथार्थोऽन्यथा शब्दोऽन्यथा प्रत्यय इति विभागः। एवं तत्प्रवि
भागसंयमात् योगिनः सर्वभूतरुतज्ञानं संपद्यत इति। १७। संस्कारसाक्षात्करणात्पू
र्वजातिज्ञानं। द्वये खल्वमी संस्काराः स्मृतिक्लेशहेतवो वासनारूपा। विपाकहेतवो
धर्माधर्मरूपा। ते पूर्वभवाभिसंस्कृताः परिणामचेष्टानिरोधशक्ति जीवन
धर्मवदपरिदृष्टाश्चित्तधर्मास्तेषु संयमः संस्कारसाक्षात्क्रियायायै समर्थः। न
च देशकालनिमित्तानुभवैर्विना तेषामस्ति साक्षात्करणं। तदित्थं संस्कारसाक्षात्का
रणात् पूर्वजातिज्ञानमुत्पद्यते योगिनः। परत्राप्येवमेव संस्कारसाक्षात्करणात्
परजातिसंवेदनं। अत्रेदमाख्यानं श्रूयते। भगवतो जैगीषव्यस्य संस्कारसाक्षात्का

रणात् दशसु महासर्गेषु जन्मपरिणामक्रममनुपश्यतो विवेकजं ज्ञानं प्रादुर्भाव।
भगवानावट्यस्तनुधरस्तमुवाच। दशसु महासर्गेषु भव्यत्वात् अनभिभूतबुद्धिस
त्त्वेन त्वया नरकतिर्यग्गर्भसंभवं दुःखं संपश्यता देवमनुष्येषु पुनः पुनरुत्पद्यमानेन सुख
दुःखयोः किमधिकमुपलब्धमिति भगवंतमावट्यं। जैगीषव्य उवाच। दशसु महास
र्गेषु भव्यत्वादनभिभूतबुद्धिसत्त्वेन मया नरकतिर्यग्भवं दुःखं संपश्यता देवमनुष्येषु पु
नः पुनरुत्पद्यमानेन यत्किंचिदनुभूतं तत्सर्वं दुःखमेव प्रत्यवैमि। भगवानावट्य उवाच
यदिदमायुष्मतः प्रधानवशित्वमनुत्तमं च संतोषसुखं किमिदमपि दुःखपक्षे निक्षिप्तमि
ति। भगवान् जैगीषव्य उवाच। विषयसुखापेक्षयैवेदमनुत्तमं संतोषसुखमुक्तं कैव
ल्यापेक्षया दुःखमेव बुद्धिसत्त्वस्यायं धर्मस्त्रिगुणः। त्रिगुणश्च प्रत्ययो हेयपक्षे न्यस्त
ख इति। दुःखरूपस्तृष्णातंतुः। तृष्णादुःखसंतापापगमात्तु प्रसन्नमबाधं सर्वानुकूलं
सुखमिदमुक्तमिति। १८। प्रत्ययस्य परचित्तज्ञानं। प्रत्यये संयमात् प्रत्ययस्य साक्षात्

रणात् ततः परस्य चित्तज्ञानं । १९ । न च तत्सालंबनं तस्याविषयीभूतत्वात् । रक्तं प्रत्ययं
जानाति । न त्वमुकालंबनेन रक्तमिति न जानाति परप्रत्ययस्य यदालंबनं तद्योगिचि
त्तेन नालंबनीकृतं परप्रत्ययमात्रं तु योगिचित्तेनालंबनीभूतमिति । २० । कायरू
पसंयमात् तद्ग्राह्यशक्तिस्तंभे चक्षुःप्रकाशासंप्रयोगे ऽन्तर्धानं । कायस्य रूपे संय
मात् रूपस्य ग्राह्यशक्तिस्तंभं प्रतिबध्नाति । तस्मिन् ग्राह्यशक्तिस्तंभे सति चक्षुःप्रकाशासं
योगे ऽन्तर्धानमुपपद्यते योगिनः । २१ । एतेन शब्दाद्यन्तर्धानमुक्तं वेदितव्यं । सोपक्रमं
निरुपक्रमं च कर्म तत्संयमादपरान्तज्ञानं अरिष्टेभ्यो वा । आयुर्विपाकं कर्म द्विविधं
सोपक्रमं निरुपक्रमं च । तत्र यथा आर्द्रं वस्त्रं वितानितं ह्रसीयसा कालेन शुष्येत ।
तथा सोपक्रमं । यथा च तदेव संपिण्डितं चिरेण संशुष्येत् एवं निरुपक्रमं । यथा वाग्निः

शुष्के कक्षे मुक्तो वातेन समंततो युक्तः क्षेपीयसा कालेन दहेत तथा सोपक्रमं यथा
वा स एवाग्निस्तृणराशौ क्रमशोवयवेषु न्यस्तश्चिरेण दहेत तथा निरुपक्रमं। त
देकभविकमायुष्करं कर्म द्विविधं सोपक्रमं निरुपक्रमं च। तत्संयमादपरांतस्य
प्रायणस्य ज्ञानं। अरिष्टेभ्यो वेति। त्रिविधमरिष्टं। आध्यात्मिकं। आधिभौतिकं
आधिदैविकं च। आध्यात्मिकं घोषं स्वदेहे पिहितकर्णो न शृणोति। ज्योतिर्वा ने
त्रे ऽवष्टब्धे न पश्यति। तथाधिभौतिकं यमपु न्पश्यति। पितृनतीता
नागतानकस्माद्वेत्ति। आधिदैविकं। स्वर्गमकस्मात्सिद्धान्वा पश्यति। विपरीतं
वा सर्वमिति। अनेन वा जानाति अपरांतमुपस्थितमिति। २३। मैत्र्यादिषु बला
नि। मैत्री करुणा मुदितेति तिस्रो भावनास्तत्र भूतेषु सुखितेषु मैत्रीं भावयि॰

त्वा मुदितावलं लभते । भावनातः समाधिर्यः स संयमः । ततो बलान्यवं
ध्यवीर्याणि जायंते । पापशीलेषु उपेक्षा न तु भावना । ततश्च तस्यां नास्ति
समाधिरिति । अतो न बलमुपेक्षातः तत्र संयमाभावादिति । २४ । बलेषु ह
स्तिबलादीनि । हस्तिबले संयमाद्धस्तिबलो भवति । वैनतेयबले संयमाद्वै
नतेयबलो भवति । वायुबले संयमाद्वायुबल इत्येवमादि ॥२५॥ प्रवृत्त्यालो
कन्यासात्सूक्ष्मव्यवहितविप्रकृष्टज्ञानं । ज्योतिष्मती प्रवृत्तिरुक्ता मनसस्त
स्या य आलोकः । ~~पंचविधोमाहें~~ तं संयोगी सूक्ष्मे व्यवहिते वा विप्रकृष्टे वार्थे वि
न्यस्य तमर्थमधिगच्छेत । २६ । भुवनज्ञानं सूर्ये संयमात् । तत्र प्रस्तारः सप्तलो
काः । तत्रावीचेः प्रभृति मेरुपृष्ठं यावदित्येव भूर्लोकः । मेरुपृष्ठादारभ्य आ ध्रुवा

सग्रहनक्षत्रताराविचित्रोऽन्तरिक्षलोकः। ततः परः स्वर्लोकः। पंचविधो माहेंद्रस्तृ
तीयो लोकः। चतुर्थः प्राजापत्यो महर्लोकः। त्रिविधो ब्राह्मः। तद्यथा। जनलोकः
तपोलोकः सत्यलोक इति। ब्राह्मस्त्रिभूमिको लोकः। प्राजापत्यस्ततो महान्। मा
हेंद्रश्च स्वरित्युक्तो दिवि तारा भुवि प्रजा इति संग्रहश्लोकः। तत्रावीचेरुपर्युपरि
निविष्टाः षण्महानरकभूमयः। घनसलिलानलानिलाकाशतमःप्रतिष्ठाः।
महाकालांबरीषरौरवमहारौरवकालसूत्रांधतामिस्राः। यत्र स्वकर्मोपार्जित
दुःखवेदनाः प्राणिनः कष्टमायुर्दीर्घमाक्षिप्य जायंते। ततो महातलरसातल
अतलसुतलवितलतलातलपातालाख्यानि सप्त पातालानि। भूमिरियमष्टमी स
प्तद्वीपा वसुमती। यस्याः सुमेरुर्मध्ये पर्वतराजः कांचनः तस्य राजतवैदूर्यस्फ

टिक हेममणिमयानि संख्याणि। तत्र वैडूर्यप्रभानुरागान्नीलोत्पलवर्ण्याभो न
र्भसो दक्षिणभागः। श्वेतः पूर्वः। स्वच्छः पश्चिमः। कुरंटकाभ उत्तरः। दक्षिणावा
र्त्ते चास्य जंबूः। यतोऽयं जंबूद्वीपः। तस्य सूर्यप्रचारात् रात्रिंदिवं लग्नमिव पर्वते
तस्य नीलश्वेतशृंगवंत उदीचीनास्त्रयः पर्वता द्विसहस्रायामाः। तदंतरे
षु त्रीणि वर्षाणि नवनवयोजनसहस्राणि

रमणकं हिरण्मयं उत्तराः कुरव इति । निषधहेमकूटहिमशैला दक्षिणतो द्विसहस्रा
यामाः । तदंतरे सुश्रीणि वर्षाणि नवनवसहस्राणि । हरिवर्षं किंपुरुषं भारतमि
ति । सुमेरोः प्राचीनाः भद्राश्वमाल्यवत्सीमानः । प्रतीचीनाः केतुमालगंधमादन
सीमानः । मध्ये वर्षमिलावृतं । तदेतद्योजनशतसाहस्रं सुमेरोर्दिशि दिशि त
दर्द्धं नव्यूढं ॥ सवलयं शतसाहस्रायायामो जंबूद्वीपः । ततो द्विगुणेन लवणोद
धिना वलयाकृतिनावेष्टितः । ततश्च द्विगुणाः द्विगुणाः शाककुशक्रौंचशा
ल्मलगोमेधपुष्करद्वीपाः । समुद्राश्च सर्षपराशिकल्पाः सुविचित्रशैलावतंसाः
इक्षुरससुरासर्पिर्दधिमंडक्षीरस्वादूदकसमुद्रपरिवेष्टिताः वलयाकृत
यो लोकालोकपर्वतपरिवाराः । पंचाशद्योजनकोटिपरिसंख्याताः । तदेत
त्सर्वं सुप्रतिष्ठितसंस्थानमंडलमध्ये व्यूढं । अंडं च प्रधानस्याणुरवयवो य

पा॰ तं॰

४८

48

याकाशे वद्योत इति। तत्र पाताले जलधौ पर्वतेष्वेतेषु देवनिकाया असुरगंधर्व
किन्नरकिंपुरुषयक्षराक्षसभूतप्रेतपिशाचापस्मारकाप्सरोब्रह्मराक्षसकूष्मा
ण्डविनायकाः प्रतिवसंति सर्वेषु द्वीपेषु पुण्यात्मानो देवमनुष्याः। सुमेरुस्त्रि
दशानामुद्यानभूमिः। तत्र मिश्रवनं नंदनं चैत्ररथं सुमनसमित्युद्यानानि।
सुधर्मा देवसभा। सुदर्शनं पुरं। वैजयंतः प्रासादः। ग्रहनक्षत्रतारकास्तु ध्रु
वे निबद्धाः। वायुविक्षेपनियमेनोपलक्षितप्रचाराः। सुमेरोरुपर्युपरि संनि
विष्टा दिवि विपरिवर्त्तंते। माहेंद्रनिवासिनः षड्देवनिकायाः। त्रिदशा अग्नि
ष्वात्ता यमाः तुषिता अपरिनिर्मितवशवर्तिनः। परिनिर्मितवशवर्त्तिन
श्चेति ते सर्वे संकल्पसिद्धाः। अणिमाद्यैश्वर्योपपन्नाः कल्पायुषो वृन्दारकाः का
मभोगिनः। औपपादिकदेहाः। उत्तमानुकूलाभिरप्सरोभिः कृतपरिवा

राःमहतिलोकेप्रजापत्येपंचविधोदेवनिकायः।कुमुदाऋभवः।प्रतर्दनाः
अजनाभाः।प्रमिताभाः।इत्येतेमहाभूतवशिनोध्यानाहाराःकल्पसहस्रा
युषः।प्रथमेब्रह्मणोजनलोकेचतुर्विधोदेवनिकायब्रह्मपुरोहिताब्रह्मका
यिकामहाकायिकाअमराइतितेभूतेंद्रियवशिनः।द्वितीयेतपसिलोके
त्रिविधोदेवनिकायः।आभास्वराः।महाभास्वराः।सत्यमहाभास्वराइति
तेभूतेंद्रियप्रकृतिवशिनः।द्विगुणद्विगुणोत्तरायुषः।सर्वेध्यानाहाराः
ऊर्ध्वमप्रतिहतज्ञानाः।अधरभूमिषुअनावृतज्ञानविषयाः।तृतीयेब्र
ह्मणःसत्यलोकेचत्वारोदेवनिकायाः।अकृतभवनन्यासाःसुप्रतिष्ठाः
उपर्युपरिस्थिताः।प्रधानवशिनः।यावत्सर्गायुषः।तत्राच्युताःसवितर्क
ध्यानसुखाःशुद्धनिवासाःसविचारध्यानसुखाः।सत्याभाआनन्द

मात्रध्यानसुखाः।सं ताःसंतिनश्च अस्मितामात्रध्यानसुखाःसत्येलोकमध्ये
अवतिष्ठंते।एतेसप्तलोकाःसर्वेब्रह्मका।विदेहप्रकृतिलयास्तुमोक्षपदे
वर्त्तंतइति।नलोकमध्येसन्यस्ता इत्येतद्योगिनांसाक्षात्करणीयंसूर्यद्वारेसं
यमंकृत्वाततोन्यत्रापितावदभ्यस्येत्तावदिदंसर्वंदृष्टमिति।चंद्रेतारा
व्यूहज्ञानं॥चंद्रेसंयमंकृत्वाताराव्यूहंविजानीयात्।२८।ध्रुवेतद्गतिज्ञानं।
ततोध्रुवेसंयमंकृत्वातारानांगतिंविजानीयात्।ऊर्ध्वविमानेषुकृतसंय
मस्तानिविजानीयात्।नाभिचक्रेकायव्यूहज्ञानं।नाभिचक्रेसंयमंकृत्वा
[illegible] कायव्यूहंविजानीयात्।वातपित्तश्लेष्माणस्त्रयोदोषाधातवःसप्त।
त्वग्लोहितमांसस्नायुअस्थिमज्जामेदः शुक्राणिपूर्वंपूर्वमेषांबाह्यमि
ति।एषविन्यासः॥३०॥कंठकूपेक्षुत्पिपासानिवृत्तिः।जिह्वायाअ

धस्तात्कंठः। ततोधस्तात्कूपः। ततोधस्तात्कूपः। तत्रसंयमात्क्षुत्पिपासेनबाधेते॥३१॥
कूर्मनाड्यां स्थैर्यं॥ कूपादधस्तादुरसिकूर्माकारानाडी तस्यांकृतसंयमः स्थिरपदंलभ
ते। यथासर्पोगोधावेति॥३२॥ मूर्धज्योतिषिसिद्धदर्शनं। शिरःकपालेंतश्छि
द्रंप्रभास्वरत्वात्ज्योतिः तत्रसंयमात्सिद्धानांद्यावापृथिव्योरंतरालवा
र्तिनांदर्शनं॥३३॥ प्रातिभाद्वासर्वं॥ प्रतिभंनामतारकंतद्विवेकजस्यज्ञान
स्यपूर्वरूपं॥ यथोदयेप्रभाभास्करस्यतेनवासर्वमेवजानातियोगीप्रातिभ
स्यज्ञानस्योत्पत्ताविति। हृदयेचित्तसंवित्। यदिदमस्मिन्ब्रह्मपुरेदहरंपुंडरी^
कंवेश्मतत्रविज्ञानंतस्मिन्संयमात्स्वचित्तसंवित्॥३४॥ सत्वपुरुषयोरत्यन्तासं
कीर्णयोः प्रत्ययाविशेषोभोगः परार्थात्स्वार्थसंयमात्पुरुषज्ञानं॥ बुद्धिसत्वं^
प्रख्याशीलंसमानसत्वोपनिबंधनेरजस्तमसीवशीकृत्यसत्वपुरुषान्यताप्र

त्वेयेन परिणतेन तस्माच्च सत्वात्परिणामिनोत्यंतविधर्मा शुद्धो ऽन्यश्चितिमात्र
रूपः पुरुषः। तयोरत्यंतासंकीर्णयोः प्रत्ययाविशेषो भोगः पुरुषस्य दर्शितविषयत्वा
त्स भोगप्रत्ययः सत्वस्य परार्थत्वाद्दृश्यः। यस्तु तस्माद्विशिष्टश्चितिमात्ररूपो ऽन्यः
पौरुषेयः प्रत्ययस्तत्र संयमात्पुरुषविषया प्रज्ञा जायते। न च पुरुषप्रत्ययेन [illegible]
बुद्धिसत्वात्मना पुरुषो दृश्यते। पुरुष एव तं प्रत्ययं स्वात्मावलंबनं पश्यति। तथा ह्यु
क्तं। विज्ञातारमरे केन विजानीयादिति॥ ३६॥ ततः प्रातिभश्रावणवेदनादर्शास्वा
दवार्त्ता जायंते॥ प्रातिभात्सूक्ष्मव्यवहितविप्रकृष्टातीतानागतज्ञानं। श्राव
णाद्दिव्यशब्दश्रवणं। वेदनाद्दिव्यस्पर्शाधिगमः। आदर्शात् दिव्यरूपसंवित्। आस्वा
दात् दिव्यरससंवित्। वार्त्तातो दिव्यगंध इत्येतानि संजायंते॥ ३७॥ ते समाधा
वुपसर्गा व्युत्थाने सिद्धयः॥ ते प्रातिभादयः समाहितचित्तस्योत्पद्यमाना ३

सर्गात्द्दर्शनप्रत्यनीकत्वात् ।व्युच्छितचित्तस्योत्पद्यमानाः स्वसिद्धयः ॥ ३८ ॥ बंधका
रणशैथिल्यात्प्रचारसंवेदनाच्च चित्तस्य परशरीरावेशः ॥ लोलीभूतस्य मनसो
ऽप्रतिष्ठस्य शरीरे कर्माशयवशाद्बंधः प्रतिष्ठेत्यर्थः । तस्य कर्मणो बंधकारणस्य
शैथिल्यं समाधिबलाद्भवति । प्रचारसंवेदनं च चित्तस्य समाधिजमेव कर्मबंध
त्यात्स्वचित्तप्रचारसंवेदनाच्च योगी चित्तस्य शरीरान्निष्कृष्य शरीरांतरेषु नि
क्षिपति ॥ निक्षिप्तं चित्तं चेंद्रियाण्यनुपतंति ॥ यथा मधुकरराजानं मक्षिका अनु
त्पतंतमनूत्पतंति निविशमानमनु निविशंते । तथेंद्रियाणि परशरीरावे
शे चित्तमनुविधीयंत इति ॥ ३९ ॥ उदानजयात्जलपंककंटकादिष्वसं
ग उत्क्रांतिश्च ॥ समस्तेंद्रियवृत्तिर्जीवनं । प्राणादिलक्षणा क्रिया । तस्य पंच
तयी । प्राणो मुखनासिकागतिराहृदयवृत्तिः । समं नयनात्समान आनाभिवृ

पा.सू.
५१

त्तिः। अपनयनात् अपानः आपादतलवृत्तिः। उन्नयनादुदान आशिरोवृत्तिः। व्यापी व्या
पन इति। एषां प्रधानं प्राणः। उदानजयात् जलपंककंटकादिष्वसंग उत्क्रांतिश्च प्रयाणकाले भवति
तां वशित्वेन प्रतिपद्यते॥४०॥ समानजयात् ज्वलनं॥ जितसमानस्तेजस उपध्मानं कृत्वा ज्वल
ति॥४१॥ श्रोत्राकाशयोः संबंधसंयमात् दिव्यं श्रोत्रं॥ सर्वश्रोत्राणामाकाशं प्रतिष्ठा शब्दानां
च॥ यथोक्तं तुल्यदेशश्रवणानामेकश्रुतित्वं सर्वेषां भवतीति॥ तच्चैतदाकाशस्य लिंगं।
अनावरणं चोक्तं॥ तथामूर्तस्यानावरणदर्शनात् विभुत्वमपि प्रख्यातमाकाशस्य। शब्दग्रह
णानुमितं श्रोत्रं बधिराबधिरयोरेकः शब्दं गृह्णाति अपरो न गृह्णातीति तस्मात् श्रोत्रमे
व शब्दविषयं॥ श्रोत्राकाशयोः संबंधे कृतसंयमस्य योगिनो दिव्यं श्रोत्रं प्रवर्तते॥४२॥ काया
काशयोः संबंधसंयमात् लघुतूलसमापत्तेश्चाकाशगमनं॥ यत्र कायस्तत्रावकाशं। तस्याव
काशदानात् कायस्य तेन संबंधः प्राप्तिः॥ तत्र कृतसंयमो जित्वा तत्संबंधं लघुतूलादिषु

आपरमाणुभ्यःसमापत्तिंलब्ध्वाजितसंवंधोलघुर्लघुत्वात्जलेपादाभ्यांविहरतितत
स्तूर्णनाभितंतुमात्रेविहृत्यरश्मिषुविहरतिततोयथेष्टमाकाशगतिरस्यभवतीति
॥४४॥बहिरकल्पितावृत्तिर्महाविदेहाततःप्रकाशावर्णक्षयः।शरीराद्बहिर्मनसो^
वृत्तिलाभोमहाविदेहानामधारणासायदिशरीरप्रतिष्ठस्यमनसोवहिर्वृत्तिमात्रेण
भवतिसाकल्पितेत्युच्यतेयातुशरीरपेक्षावहिर्भूतस्यैवमनसोवहिर्वृत्तिःसाखल्व^ निरे
कल्पिता॥तत्रकल्पितयासाधयंत्यकल्पितांमहाविदेहांइति।ययापरशरीराण्यावि
शंतियोगिनः ततश्चधारणातःप्रकाशात्मनोवुद्धिसत्वस्ययदावरणंक्लेशकर्मवि^
पाकत्रयंरजस्तमोमूलंतस्यचक्षयोभवति॥४५॥स्थूलस्वरूपसूक्ष्मान्वयार्थवत्वसं
यमाद्भूतजयः॥तत्रपार्थिवाद्याःशब्दादयोविशेषाःसहाकारादिभिर्धर्मैः

स्थूलशब्देनपरिभाषिताः॥एतद्भूतानांप्रथमंरूपं।द्वितीयंरूपंस्वसामान्यं।मूर्त्तिर्भूमिः
स्नेहोजलंवह्निरुष्णता।वायुःप्रणामी।सर्वतोगतिराकाशः।इत्येतत्स्वरूपशब्देनोच्यते।अ
स्यसामान्यस्यशब्दादयोविशेषाः।तथाचोक्तं।एकजातिसमन्वितानामेषांधर्ममात्र
व्यावृत्तिरिति।सामान्यविशेषसमुदायोत्रद्रव्यं।द्विष्ठोहिसमूहः।प्रत्यस्तमितभेदावय
वानुगः।शरीरंवृक्षोयूथंवनमिति।शब्देनोपात्तभेदावयवानुगतःसमूहः।उभयेदेवम
नुष्याः।समूहस्यदेवाःएकोभागःमनुष्याःद्वितीयोभागस्ताभ्यामेवाभिधीयतेसमूहः।स
चभेदाभेदविवक्षितः।आम्राणांवनंब्राह्मणानांसंघः।आम्रवनंब्राह्मणसंघइतिसपुन
र्द्विविधोयुतसिद्धावयवोयुतसिद्धावयवश्च।युतसिद्धावयवःसमूहोवनंसंघइति।अयु
तसिद्धावयवःसंघातःशरीरंवृक्षःपरमाणुरिति।अयुतसिद्धावयवभेदानुगतःसमूहो
द्रव्यमितिपतंजलिः।एतत्स्वरूपमित्युक्तं।अथकिमेषांसूक्ष्मरूपंतन्मात्रंभूतकारण
तस्यैकोवयवःपरमाणुसामान्यविशेषात्मायुतसिद्धावयवभेदानुगतः।समुदायइत्येवं

सर्वतन्मात्राणामेतत्तृतीयं। अथ भूतानां चतुर्थं रूपं ख्यातिक्रियास्थितिशी-
लाः गुणाः कार्यस्वभावानुपातिनोऽन्वयशब्देनोक्ताः। अथैषां पंचमं रूपमर्थवत्त्वं भो-
गापवर्गार्थता गुणेष्वन्वयिनी गुणास्तन्मात्रभूतभौतिकेष्विति सर्वमर्थवत्। ते-
ष्विदानीं भूतेषु पंचसु पंचरूपेषु संयमात्तस्य तस्य रूपस्य स्वरूपदर्शनं जयश्च प्रादुर्भवति।
तत्र पंच भूतस्वरूपाणि जित्वा भूतजयी भवति। तज्जयाद्वत्सानुसारिण्य इव गावो-
ऽस्य संकल्पानुविधायिन्यो भूतप्रकृतयो भवंति ॥४४॥ ततोऽणिमादिप्रादुर्भावः का-
यसंपत्तद्धर्मानभिघातश्च ॥ तत्राणिमा भवत्यणुः। लघिमा लघुर्भवति। महिमा म-
हान् भवति। प्राप्तिरंगुल्यग्रेणापि स्पृशति चंद्रमसं। प्राकाम्यमिच्छानभिघातः
भूमावुन्मज्जति निमज्जति यथोदके ॥ वशित्वं भूतभौतिकेषु वशी भवति। अ-
वश्यश्चान्येषां ॥ ईशित्वं तेषां प्रभवाप्ययव्यूहानामीष्टे। यत्रकामावसायित्वं सत्य-
संकल्पता। यथा संकल्पस्तथा भूतप्रकृतीनामवस्थानं। न च शक्तोऽपि पदार्थ

पातं

५३

विपर्यासंकरोतीऽकस्मादन्यस्यजगत्कामावसायिनःपूर्वसिद्धस्यतथाभूतेषुसं
कल्पादिति।एतान्यष्टावैश्वर्याणि।कायसंपद्वक्ष्यमाणा।तद्धर्मानभिघातः।पृथ्वी
५७ मूर्त्यानन्निरुणद्धियोगिनःशरीरादिक्रियां।शिलामप्यनुविशतीति।नापःस्नि
ग्धाःक्लेदयंति।नाग्निरुष्मोदहति।नवायुःप्रणामीवहत्यनावरणात्मकेप्याका
काशेभवत्यावृतकायःसिद्धानामप्यदृश्योभवति॥४६॥रूपलावण्यबलवज्र
संहननत्वानिकायसंपत्॥दर्शनीयःकांतिमान्अतिशयबलः।वज्रसंहनन
श्चेति।ग्रहणस्वरूपास्मितान्वयार्थवत्त्वसंयमादिंद्रियजयः॥सामान्यविशेषा
त्माशब्दादिर्ग्राह्यस्तेष्विंद्रियाणांवृत्तिर्ग्रहणं।नचतत्सामान्यमात्रेग्रहणाका
रं।कथमनालोचितस्यविषयबुद्धिविशेषइन्द्रियेणमनसानुव्यवसीयतेति॥स्व
रूपंपुनःप्रकाशात्मनोहिबुद्धिसत्त्वस्यसामान्यविशेषयोरयुतसिद्धावयवभेदा
नुगतःसमूहोद्रव्यमिन्द्रियं।तेषांतृतीयरूपं।अस्मितालक्षणोऽहंका

रः तस्य सामान्यस्येन्द्रियाणि विशेषाः चतुर्थं रूपं व्यवसायात्मकाः प्रकाशक्रिया
स्थितिशीला गुणा येषामिन्द्रियाणि साहंकाराणि परिणामः पंचमं रूपं गुणेषु यदनु
गतं पुरुषार्थवत्वमिति। पंचस्वेतेष्विन्द्रियरूपेषु यथाक्रमं संयमः तत्र तत्र जयं कृत्वा
पंचरूपजयादिन्द्रियजयः प्रादुर्भवति योगिनः॥४८॥ ततो मनोजवित्वं विकरण
भावः प्रधानजयश्च कायस्यानुत्तमो गतिलाभो मनोजवित्वं विदेहानामिन्द्रिया
णामभिप्रेतकालदेशविषयापेक्षो वृत्तिलाभो विकरणभावः। सर्वप्रकृतिविका
रवशित्वं प्रधानजय इत्येतास्तिस्रः सिद्धयो मधुप्रतीका उच्यंते एताश्च करणपं
चकस्वरूपजयादधिगम्यंते॥४९॥ सत्वपुरुषान्यताख्यातिमात्रस्य सर्वभावाधिष्ठा
तृत्वं सर्वज्ञातृत्वं च॥ निर्धूतरजस्तमोमलस्य बुद्धिसत्वस्य परे वैशारद्ये परस्यां वशीकारसंज्ञायां
वर्तमानस्य सत्वपुरुषान्यताख्यातिमात्ररूपप्रतिष्ठस्य सर्वभावाधिष्ठातृत्वं। सर्वात्मानो गु
णा व्यवसायव्यवसेयात्मकाः स्वामिनं क्षेत्रज्ञं प्रत्यशेषदृश्यात्मत्वेनोपस्थिता इत्यर्थः॥
सर्वज्ञातृत्वं सर्वात्मनां गुणानां शान्तोदिताव्यपदेश्यधर्मत्वेन व्यवस्थितानामक्रमोपा

रूपं विवेकजंज्ञानमित्यर्थः । इत्येषा विशोकानाम सिद्धिः । यां प्राप्य योगी सर्वज्ञः क्षीणक्ले
शबंधनो वशी विहरति ॥४९॥ तद्वैराग्यादपि दोषबीजक्षये कैवल्यं ॥ यदास्यैवं भवति क
र्मक्लेशक्षये सत्वस्यायं विवेकप्रत्ययः । सत्वं च हेयपक्षे न्यस्तं पुरुषश्चापरिणामी शुद्धोऽन्यः
सत्वादित्येवमस्य ततो विरज्यमानस्य । यानि क्लेशबीजानि दग्धशालिबीजकल्पानि ।
अप्रसवसमर्थानि ॥ तानि सह मनसा प्रत्यस्तं गच्छंति । तेषु प्रलीनेषु पुरुषः पुनरिदं ता
पत्रयं न भुंक्ते । तदेतेषां गुणानां मनसि कर्मक्लेशविपाकस्वरूपेणाभिव्यक्तानां चरि
तार्थानां प्रतिप्रसवे पुरुषस्यात्यंतिको गुणवियोगः कैवल्यं तदा स्वरूपप्रतिष्ठा चितिश
क्तिरेव पुरुष इति ॥५०॥ स्थान्युपनिमंत्रणे संगस्मयाकरणं पुनरनिष्टप्रसंगात् ॥ चत्वारः
खल्वमी योगिनः । प्रथमकल्पिको मधुभूमिकः प्रज्ञाज्योतिरतिक्रांतभावनीयश्चेति
तत्राभ्यासी प्रवृत्तमात्रज्योतिः प्रथमः । ऋतंभरप्रज्ञो द्वितीयः ॥ भूतेंद्रियजयी तृतीयः
सर्वेषु भावितेषु भावनीयेषु कृतरक्षाबंधः कृतकर्तव्यसाधनादिमान् चतुर्थो यस्त्वति
क्रांतभावनीयस्तस्य चित्तप्रतिसर्ग एकोऽर्थः । सप्तविधास्य प्रांतभूमिप्रज्ञाः ॥ तत्र म

घुमतींभूमिंसाक्षात्कुर्वतोब्राह्मणस्यस्थानिनोदेवाःसत्वशुद्धिमनुपश्यन्तःस्थानैरुपमंत्रय
न्तेभोइहास्यतांकमनीयंभोगःकमनीयेयंकन्यारसायनमिदंजरामृत्युंबाधतेवैहायसमिदंयानं
अमीकल्पद्रुमाःपुण्यामंदाकिनीसिद्धामहर्षयःउत्तमानुकूलाःअप्सरसोदिव्येश्रोत्रचक्षुषीव
ज्रोपमःकायःस्वगुणैःसर्वमिदमुपार्जितमायुष्मताप्रतिपद्यतां।इदमक्षयमजरममरंस्थानंदे
वानांप्रियमित्येवमभिधीयमानःसंगदोषान्भावयेत्घोरेषुसंसारांगारेषुपच्यमानेनमयाज
ननमरणान्धकारेविपरिवर्तमानेनकथंचिदासादितःक्लेशतिमिरविनाशीयोगप्रदीपः
तस्यचैतेतृष्णायोनयाविषयवायवःप्रतिपक्षाःसखल्वहंलब्धालोकःकथमनयाविषयमृ
गतृष्णयावंचितःतस्यैवपुनःप्रदीप्तस्यसंसाराग्नेरात्मानमिंधनीकुर्यामितिस्वस्तिवःस्व
प्नोपमेभ्यःकृपणजनप्रार्थनीयेभ्योविषयेभ्यइत्येवंनिश्चितमतिःसमाधिंभावयेत्
संगमकृत्वास्मयमपिनकुर्यात्एवमहंदेवानामपिप्रार्थनीयइतिस्मयादयंसुस्थितंमन्यत
यामृत्युनाकेशेषुगृहीतइवात्मानंनभावयिष्यति।तथाचास्यछिद्रांतरप्रेक्षीनित्यंयत्नोप
चर्यःप्रमादोलब्धविवरःक्लेशानुत्तंभयिष्यति।ततश्चपुनरनिष्टप्रसंगः।एवमस्यसंगस्म

यावक्कुर्वतो भावितोर्थो दृढी भविष्यति। ~~तथा चास्य छिद्रान्तरप्रेक्षी नित्यं यत्नोपचर्यः~~ प्रमादो
भावनीयश्चाभिमुखीभविष्यतीति ॥५१॥ क्षणतत्क्रमयोः संयमाद्विवेकजं ज्ञानं ॥ यथापकर्षप
र्यंतं द्रव्यं परमाणुरेवं परमापकर्षपर्यंतः कालः क्षणः। यावता वा समयेन चलितः परमाणुः पू
र्वदेशं जह्यात् उत्तरदेशमुपसंपद्येत स कालः क्षणः तत्प्रवाहाविच्छेदस्तु क्रमः क्षणतत्क्रमयोर्नास्ति
वस्तुसमाहार इति। बुद्धिसमाहारो मुहूर्ताहोरात्रादयः। स खल्वयं कालो वस्तुशून्योपि बुद्धिनिर्माणः
शब्दज्ञानानुपाती लौकिकानां व्युत्थितदर्शनानां वस्तुस्वरूप इवावभासते। क्षणस्तु वस्तुपति
तः क्रमावलंबी क्रमश्च क्षणानन्तर्यात्मा तं कालविदः काल इत्याचक्षते योगिनः। न च द्वौ क्षणौ स
ह भवतः। क्रमश्च न द्वयोः सहभुवोरसंभवात्। पूर्वस्मादुत्तरस्य भाविनो यदानन्तर्यं क्षणस्य
स क्रमः। तस्माद्वर्तमान एवैकः क्षणः न पूर्वोत्तरक्षणाः संतीति। तस्मान्नास्ति तत्समाहारः। ये
तु भूताभाविनः क्षणास्ते परिणामान्विता व्याख्येयाः। तेनैकेन क्षणेन कृत्स्नो लोकः परिणा
ममनुभवति। तत्क्षणोपारूढाः खल्वमी सर्वे धर्माः तयोः क्षणतत्क्रमयोः संयमात्तयोः
साक्षात्करणं ततश्च विवेकजं ज्ञानं प्रादुर्भवति। तस्य विषयविशेष उपक्षिप्यते ॥

॥५३॥ जातिलक्षणदेशैरन्यतानवच्छेदात्तुल्ययोस्ततः प्राप्तिः प्रतिपत्तिः तुल्ययोर्देशलक्षणसारूप्ये
जातिभेदोऽन्यतायां हेतुः। गौरियं वडवेति। तुल्यदेशजातीयत्वे लक्षणमन्यत्वकरं। कालाक्षी गौः।
स्वस्तिमती गौरिति। द्वयोरामलकयोर्जातिलक्षणसारूप्याद्देशभेदोऽन्यत्वकरः इदं पूर्वमिदमुत्तरमि
ति। यदा तु पूर्वमामलकमन्यव्यग्रस्य ज्ञातुरुत्तरदेशे उपावर्त्यते तदा तुल्यदेशत्वे पूर्वमेतदुत्तरमेतदि
ति प्रविभागानुपपत्तिः। असंदिग्धेन च तत्त्वज्ञानेन भवितव्यः इत्यत इदमुक्तं। ततः प्रतिपत्तिरिति विवे
कजं ज्ञानमिति। कथं पूर्वामलकसहलक्षणादेशानुत्तरामलकसहलक्षणाद्देशाद्भिन्नः।
ते चामलके स्वदेशलक्षणानुभवभिन्ने ऽन्यदेशलक्षणानुभवस्तयोरन्यत्वे हेतुरिति। एतेन दृष्टा
न्तेन परमाणोस्तुल्यजातिलक्षणदेशस्य पूर्वपरमाणुदेशसहलक्षणसाक्षात्करणादुत्तरस्य प
रमाणोस्तद्देशानुपपत्तावुत्तरस्य देशानुभवो भिन्नः। लक्षणः हसह लक्षणभेदात्तयोरीश्वरस्याप्य
न्यत्वप्रत्ययो भवतीति। अपरे तु वर्णयन्ति। येऽन्त्या विशेषास्ते ऽन्यतां प्रत्ययं कुर्वन्तीति। तत्रा
पि देशलक्षणभेदो मूर्तिव्यवधिजातिभेदश्चान्यत्वे हेतुः। लक्षणभेदस्तु योगिबुद्धिगम्य एवेति।
अत उक्तं। मूर्तिव्यवधिजातिभेदाभावान्नास्ति मूलपृथक्त्वमिति वार्षगण्यः॥५३॥ तार

कं सर्वविषयं सर्वथाविषयमक्रमं चेति विवेकजं ज्ञानं ॥ तारकमिति स्वप्रतिभोत्थम
नौपदेशिकमित्यर्थः ॥ सर्वविषयत्वान्नास्य किंचिदविषयीभूतमित्यर्थः । सर्वथाविष
यं सर्वमतीतानागतप्रत्युत्पन्नं सर्वं पर्यायैः सर्वथा जानातीत्यर्थः ॥ अक्रममित्येकदा ए
यारूढं सर्वथा गृह्णातीत्यर्थः । एतद्विवेकजं ज्ञानं परिपूर्णमस्यैवांशो योगप्रदीपो मधुमती
भूमिमुपादाय यावदस्य परिसमाप्तिरिति । प्राप्तविवेकजज्ञानस्याप्राप्तविवेकजज्ञानस्य
वा ॥ ५५ ॥ सत्वपुरुषयोः शुद्धिसाम्ये कैवल्यमिति ॥ यदा निर्धूतरजस्तमोमलं बुद्धिसत्व
पुरुषस्यान्यताप्रत्ययमात्राधिकारं दग्धक्लेशबीजं भवति । तदा पुरुषस्य शुद्धिसारूप्य
मिवापन्नं भवति । एतस्यामवस्थायां कैवल्यं भवति ईश्वरस्यानीश्वरस्य वा विवेकजज्ञा
नभागिन इतरस्य वा । नहि दग्धक्लेशबीजस्य ज्ञाने पुनरपेक्षा काचिदस्ति । सत्वशुद्धि
द्वारेणैतत्समाधिजमैश्वर्यं ज्ञानं चोपक्रांतं परमार्थतस्तु ज्ञानाददर्शनं निवर्तते ॥ ए
तस्मिन्निवृत्ते न संत्युत्तरे क्लेशाः । क्लेशाभावात्कर्मविपाकाभावः । चरिताधिकारा
श्चैतस्यामवस्थायां गुणा पुरुषस्य पुनर्दृश्यत्वेनोपतिष्ठंते । तत्पुरुषस्य कैवल्यं ॥

तदा पुरुषः स्वरूपमात्रज्योतिरमलः केवली भवति ॥५६॥ इति पातंजले सांख्यप्रवचने विभू
तिपादस्तृतीयः ॥३॥ जन्मौषधिमंत्रतपःसमाधिजाः सिद्धयः ॥ देहांतरिता जन्मसिद्धिः ओष
धिभिरसुरभवनेषु रसायनेनेत्येवमादि । मंत्रैराकाशगमनाणिमादिलब्धिः तपसा संकल्पसि
द्धिः कामरूपी यत्रतत्रकामग इत्येवमादि । समाधिजाः सिद्धयो व्याख्याताः । तत्र कायेन्द्रियाणाम
न्यजातिपरिणतानां जात्यंतरपरिणामः प्रकृत्यापूरात् । पूर्वपरिणामापाये उत्तरपरिणामोप
जनः तेषामपूर्वावयवानुप्रवेशाद्भवति । कायेंद्रियप्रकृतयश्च स्वंस्वं विकारमनुगृह्णन्ति
आपूरेण धर्मादिनिमित्तमपेक्षमाणा इति ॥ निमित्तमप्रयोजकं प्रकृतीनां वरणभेदस्तु ततः क्षे
त्रिकवत् ॥ नहि धर्मादिनिमित्तं प्रयोजकं भवति प्रकृतीनां । न कार्येण कारणं प्रवर्त्यत इति । कथं
तर्हि वरणभेदस्तु ततः क्षेत्रिकवत् । यथा क्षेत्रिकः केदारादपां पूर्णात् केदारांतरं पिप्लावयिषुः समं
निम्नं निम्नतरं वा मायः पाणिनापकर्षति । आवरणं त्वासां भिनत्ति । तस्मिन्भिन्ने स्वयमेवापः केदारांतरमाप्ला
वयंति तथा धर्मः प्रकृतीनां आवरणमधर्मं भिनत्ति । तस्मिन्भिन्ने स्वयमेव प्रकृतयः स्वंस्वं विकारमाप्लाव
यंति । यथा वा स एव क्षेत्रिकः । तस्मिन्नेव केदारे न प्रभवति औदकान्भौमान्वा रसान् धान्यमूला

न्यमुप्रवेशयितुं।किंतर्हिसुकृतगवेधुकश्यामाकादींस्तनोपकर्षति।अपकृष्टेषुतेषुस्वयमेवरसाधान्य
मूलान्यनुप्रविशंति।तथाधर्मोनिवृत्तिमात्रेकारणंधर्मस्यशुद्ध्यशुद्ध्योरत्यंतविरोधात्।नतुप्रकृ
तिनिवृत्तोप्रवृत्तोधर्मोहेतुर्भवतीति।अत्रनंदीश्वरादयउदाहार्याविपर्ययेण्यधर्मोधर्मंबाधते।
ततश्चाशुद्धिपरिणामइति।तत्रापिनहुषाजगरादयउदाहार्याः।यदातुयोगीबहून्कायान्निर्मिमीते
तदाकिमेकमनस्कास्तेभवंत्यथानेकमनस्काइति॥निर्माणचित्तान्यस्मितामात्रात्॥अस्मिता
मात्रंचित्तकारणमुपादायनिर्माणचित्तानिकरोतिततःचित्तानिभवंतीति॥४॥प्रवृत्तिभेदेप्र
योजकंचित्तमेकमनेकेषां॥बहूनांचित्तानांकथमेकचित्ताभिप्रायपुरःसराप्रवृत्तिरिति
सर्वचित्तानांप्रणाचित्तंजन्मौषधिमंत्रतपःसमाधियाःसिद्धयइति।तत्प्रयोजकंचित्तमे
कंनिर्मितेततःप्रवृत्तिभेदः॥५॥तत्रध्यानजमनाशयं॥पंचविधंनिर्माणचित्तंजन्मौ
षधिमंत्रतपःसमाधिजाःसिद्धयइति॥तत्रयदेवध्यानजंचित्तंतदेवानाशयं॥तस्यैव
नास्त्याशयोरागादिप्रवृत्तिः।नातःपुण्यपापाभिसंबंधःक्षीणक्लेशत्वाद्योगिनइति।द।
इतरेषांतुविद्यतेकर्माशयोयतः॥कर्माशुक्लाकृष्णंयोगिनस्त्रिविधमितरेषां॥चतु

ष्पदा खल्वियं कर्मजाति। कृष्णा शुक्लकृष्णा शुक्ला अशुक्लाकृष्णा चेति। तत्र कृष्णा दुरात्मनां शु
क्लकृष्णा बहिःसाधनसाध्या तत्र परपीडानुग्रहद्वारेण कर्माशयप्रचयः शुक्ला तपःस्वाध्याय
ध्यानवतां। सा हि केवले मनसि आयंतत्वादबहिःसाधनाधीना न परान् पीडयित्वा भव
ति। अशुक्लाकृष्णा सन्यासिनां क्षीणक्लेशानां चरमदेहानामिति। तत्राशुक्लं योगिन एव सन्या
सादकृष्णं चानुपादानात्। इतरेषां तु भूतानां पूर्वमेव त्रिविधमिति॥७॥ ततस्तद्विपाकानु
गुणानामेवाभिव्यक्तिर्वासनानां॥ तत इति त्रिविधात् कर्मणः तद्विपाकानुगुणानामेवे
ति यज्जातीयस्य कर्मणो यो विपाकः तस्यानुगुणा या वासनाः कर्मविपाकमनुशेरते तासामे
वाभिव्यक्तिः। नहि दैवं कर्म विपाच्यमानं नारकतिर्यङ्मनुष्यवासनाभिव्यक्तिनिमित्तं भ
वति। किंतु दैवानुगुणा एवास्य वासना व्यज्यंते॥ नारकतिर्यङ्मनुष्येषु चैवं समानश्चर्चः।८।
जातिदेशकालव्यवहितानामप्यानंतर्यं स्मृतिसंस्कारयोरेकरूपत्वात्॥ वृषदंशवि
पाकोदयः स्वव्यंजकांजनाभिव्यक्तः। स यदि जातिशतेन वा दूरदेशतया वा कल्पश

तेनवाव्यवहितः।पुनश्च स्वव्यंजकांजन उदियात्द्रागित्येवं पूर्वानुभूतंवृषदंशविपाकाभि
संस्कृतावासनानुपादायव्यज्येत्।कस्मात्यतोव्यवहितानामप्यासांसदृशंकर्माभिव्यंजकंनिमि
त्तीभूतमित्यानंतर्यमेव।कुतश्चस्मृतिसंस्कारयोरेकरूपत्वात्।यथानुभावास्तथासंस्कारास्तेचवा
सनारूपाः।यथाचवासनास्तथास्मृतिः।जातिदेशकालव्यवहितेभ्यःसंस्कारेभ्यःस्मृतिःस्मृ
तेश्चपुनःसंस्काराइत्येवमेतेस्मृतिसंस्काराःकर्माशयवृत्तिलाभवशाद्व्यज्यंते।अतश्च
व्यवहितानामपिनिमित्तनैमित्तिकभावानुच्छेदानंतर्यमेवसिद्धमिति॥९॥तासामनादित्वं
चाशिषोनित्यत्वात्॥तासांवासनानामाशिषोनित्यत्वादनादित्वं।येयमात्माशीर्मानभू
वंभूयासमिति।सर्वस्यदृश्यते।सास्वाभाविकीकस्मात्।जातमात्रस्याननुभूतमरणध
र्मकस्यद्वेषदुःखानुस्मृतिनिमित्तोमरणत्रासःकथंभवेत्।नचस्वाभाविकंवस्तुनिमित्त
मुपादत्ते।तस्मादनादिवासनानुविद्धमिदंचित्तंनिमित्तवशात्काश्चिदेववासनाःप्रतिल
भ्यपुरुषस्यभोगायोपवर्तत इति।घटप्रासादप्रदीपकल्पंसंकोचविकाशिचित्तंशरीर

परिणामाकारमात्रं इति। अपरे प्रतिपन्नाः। तथा चांतराभावः संसारश्च युक्त इति। वृत्ति
रेवास्य विभुनः संकोचिनी विकाशिनी त्याचार्यः। तच्च धर्मादिनिमित्तापेक्षं। निमित्तं
च द्विविधं। बाह्यं आध्यात्मिकं च। शरीरादिसाधनापेक्षो बाह्यं। स्तुतिदानाभिवादनादि।
चित्तमात्राधीनं श्रद्धाद्याध्यात्मिकं। तथा चोक्तं। ये चैते मैत्र्यादयो ध्यायिनां विहाराः
स्ते बाह्यसाधननिरनुग्रहात्मानः प्रकृष्टं धर्ममभिनिर्वर्तयंति॥ तयोर्मानसं बलीयः।
कथं। ज्ञानवैराग्ये केनातिशय्येते। दंडकारण्यं च चित्तबलव्यतिरेकेण कः शारीरेण कर्म
णा शून्यं कर्तुमुत्सहेत। समुद्रमगस्त्यवद्वा पिबेत॥१०॥ हेतुफलाश्रयालंबनैः संगृहीतत्वादेषां
अभावे तदभावः। हेतुर्धर्मात्सुखं अधर्माद्दुःखं। सुखाद्रागो दुःखाद्द्वेषः ततश्च प्रयत्नः।
तेन मनसा वाचा कायेन वा परिस्पंदमानः परमनुगृह्णाति उपहंति वा। ततः पुनर्धर्माध
र्मौ सुखदुःखे रागद्वेषौ इति प्रवृत्तमिदं षडरं संसारचक्रं॥ अस्य च प्रतिक्षणमावर्तमान
स्य अविद्या नेत्री मूलं सर्वक्लेशानामित्येष हेतुः। फलं तु यमाश्रित्य यस्य प्रत्युत्पन्नतः

पातं
५९

51

धर्मादेः। नह्यपूर्वोपजननः मनस्तु साधिकारमाश्रयो वासनानां। नह्यवसिताधिकारे मनसि
निराश्रया वासनाः स्थातुमुत्सहंते। यदभिमुखीभूतं वस्तु यां वासनां व्यनक्ति तत्तस्यास्तदाल
बनं। एवं हेतुफलाश्रयालंबनैरेतैः संगृहीताः सर्वा वासनाः। एषामभावेन तत्संश्रयाणा
मपि वासनाभावः। नास्त्यसतः संभवो न चास्ति सतो विनाश इति॥ द्रव्यत्वेन संभवंत्यः कथं
निवर्तिष्यंते वासना इति॥१२॥ अतीतानागतं स्वरूपतोऽस्त्यध्वभेदाद्धर्माणां॥ अनुभू
तव्यक्तिकं अतीतं। भविष्यद्व्यक्तिकमनागतं। स्वव्यापारोपारूढं वर्तमानं। त्रयं चैतद्व
स्तुतानस्त्येव। यदि चैतत्स्वरूपतो नाभविष्यत् नेदं निर्विषयं ज्ञानमुदपत्स्यत। तस्मा
दतीतानागतं स्वरूपतोस्तीति॥ किंच॥ भोगभागीयस्य वा॥ अपवर्गभागीयस्य वा कर्मणः क
फलमुत्पित्सु यदि निरुपाख्यमिति तदुद्देशेन तेन निमित्तेन कुशलानुष्ठानं न युज्येत।
सतश्च फलस्य निमित्तं वर्तमानीकरणे समर्थं। नापूर्वोपजनने॥ सिद्धं निमित्तं नैमित्ति
कस्य विशेषानुग्रहणं कुरुते नापूर्वमुत्पादयतीति। धर्मी चानेकधर्मस्वभावः तस्य चाध्व

भेदेन धर्माः प्रत्यवस्थिताः । न च यथा वर्त्तमानं व्यक्तिविशेषापन्नं द्रव्यतोस्ति एव
मतीतानागतं च । कथं तर्हि स्वेनैव व्यंग्येन स्वरूपेणानागतमस्ति । स्वेन चानुभूतव्य
क्तिकेन स्वरूपेणातीतमिति । वर्तमानस्यैवाध्वनः स्वरूपव्यक्तिरिति । न सा भवत्यत
तीतानागतयोरध्वनोरेकस्य चाध्वनः समन्वये द्वावध्वानौ धर्मिसमन्वागतौ भव
त एवेति ॥ नाभूत्वा भावस्त्रयाणामध्वनामिति ॥ १२ ॥ ते व्यक्तसूक्ष्मा गुणात्मानः ॥ ते
खल्वमी ३ ध्वानो धर्मा वर्तमाना व्यक्तात्मानोऽतीतानागताः सूक्ष्मात्मानः षड्विशे
षरूपाः । सर्वमिदं गुणानां संनिवेशमात्रमिति । परमार्थतो गुणात्मानः । तथा च शा
स्त्रानुशासनं गुणानां संनिवेशमात्रमिति × परमं रूपं न दृष्टिपथमृच्छति । यत्तु
दृष्टिपथं प्राप्तं तन्मायैव सुतुच्छकमिति । यदा तु सर्वे गुणाः कथमेकः शब्द एक
मिन्द्रियमिति ॥ १३ ॥ परिनामैकत्वाद्वस्तुतत्त्वं ॥ प्रख्याक्रियास्थितिशीलानां गुणानां

ग्रहणात्मकानां करणभावेनैकः परिणामः श्रोत्रमिंद्रियं ॥ ग्राह्यात्मकानां शब्दभावे
नैकः परिणामः शब्दो विषय इति । शब्दादीनां मूर्तिसमानजातीयानां एकः परिणा
मः तन्मात्रावयवपृथिवीपरमाणुः तन्मात्रावयवः तेषां चैकः परिणामः पृथिवी ॥
गौर्वृक्षः पर्वत इति । एवमादिः भूतांतरेष्वपि स्नेहौष्ण्यप्रणामित्वावकाशदानान्युपादा
सामान्यमेकविकारारंभः समाधेयः । नास्त्यर्थो विज्ञानसहचरो लक्षितानं अर्थविसह
चरं स्वप्नादौ कल्पितमित्यनया दिशा ये वस्तुस्वरूपमपह्नुवते ज्ञानपरिकल्पनामात्रं वस्तु
स्वप्नविषयोपमं न परमार्थतोस्तीति याहुः ते तथेति प्रत्युपस्थितं स्वमाहात्म्येन वस्तु
कथमप्रमाणात्मकेन विकल्पविज्ञानबलेन वस्तुस्वरूपमुपगृह्य तदेवापलपंत श्रद्धेय
वचनाः स्युः कुतश्चैतदन्याय्यं ॥ १४ ॥ वस्तुसाम्ये चित्तभेदात्तयोर्विभक्तः पंथाः ॥ वस्तुचि
त्तावलंबनीभूतमेकं वस्तुसाधारणं तत्र वस्तु नैकचित्तपरिकल्पितं नाप्यनेकचित्त
परिकल्पितं । किंतु स्वप्रतिष्ठं । कथं वस्तुसाम्ये चित्तभेदात् । धर्मापेक्षं चित्तस्य वस्तुसा

म्येपि सुखज्ञानं भवति।अधर्मापेक्षं तत एव दुःखज्ञानं।अविद्यापेक्षं तत एव मूढज्ञा
नं।सम्यग्दर्शनापेक्षं तत एव माध्यस्थ्यज्ञानमिति।कस्य चित्तेन परिकल्पितं।न चान्य
चित्तपरिकल्पितेनार्थेनान्यस्य चित्तोपरागो युक्तः।तस्माद्वस्तुज्ञानयोर्ग्राह्यग्रहणभेदभि
न्नयोर्विभक्तः पंथा नानयोः संकरगंधोप्यस्तीति।सांख्यपक्षे वस्तु पुनस्त्रिगुणं चलं च गुण
वृत्तमिति।धर्मादिनिमित्तापेक्षं चित्तैरभिसंबध्यते।निमित्तानुरूपस्य च प्रत्ययस्यो
त्पद्यमानस्य तेन तेनात्मना हेतुर्भवति।केचिदाहुः।ज्ञानसहभूरेवार्थो भोग्यत्वात्सु
खादिवदिति।त एतया द्वारा साधारणत्वं बाधमानाः पूर्वोत्तरक्षणेषु वस्तुरूपमेवापह्नु
वते।१५।।न चैकचित्ततंत्रं चेद्वस्तु तदप्रमाणकं तदा किं स्यात्।।एकचित्ततंत्रं चेद्वस्तु स्यात्त
रु च्चित्ते निरुद्धे व्यग्रे वा स्वरूपमेव तेनापरामृष्टमन्यस्याविषयीभूतं।अप्रमाणकमगृहीतस्व
भावकं केनचित्तदानीं किं तत्स्यात्।संबध्यमानं वा पुनश्चित्तेन कुत उत्पद्येत।ये चास्यानु
पस्थिता भागास्ते चास्य न स्युः।एवं नास्ति पृष्ठमित्युदरमपि न गृह्येत।तस्मात्स्वतंत्रोर्थः सर्व
पुरुषसाधारणः स्वतंत्राणि च चित्तानि प्रतिपुरुषं प्रवर्तंते तयोः संबंधादुपलब्धिः

61

पुरुषस्य भोग इति ॥१६॥ तदुपरागापेक्षित्वाच्चित्तस्य वस्तु ज्ञाताज्ञातं ॥ अयस्कान्तमणि
कल्पा विषयाः अयःसधर्मकं चित्तमभिसंबध्योपरंजयंति। येन विषयेणोपरक्तं चि
त्तं स विषयो ज्ञातः ततोन्ये पुनरज्ञाताः। वस्तुनो ज्ञाताज्ञातत्वात् परिणामि चित्तं। यस्य
तु तदेव चित्तं विषयस्तस्य ॥१७॥ सदा ज्ञाताश्चित्तवृत्तयस्तत्प्रभोः पुरुषस्यापरिणा
मात् ॥ यदि चित्तवत् प्रभुरपि पुरुषः परिणमेत् ततस्तद्वृत्तयश्चित्तवृत्तयः शब्दादि
विषयवज्ज्ञाताज्ञाताः स्युः सदा ज्ञातत्वं तु मनसस्तत्प्रभोः पुरुषस्यापरिणामित्वम
नुमापयति। स्यादाशंका चित्तमेव स्वाभासं विषयाभासं च भविष्यतीति अग्निवत्
॥१८॥ न तत्स्वाभासं दृश्यत्वात् ॥ अथेतराणींद्रियाणि शब्दादयश्च दृश्यत्वान्न स्वाभासा
नि तथा मनोपि प्रत्येतव्यं। न चाग्निरत्र दृष्टान्तः। न ह्यग्निरात्मरूपमप्रकाशं प्रकाशय
ति। प्रकाशश्चायं प्रकाश्यप्रकाशकसंयोगे दृष्टः। न च स्वरूपमात्रेस्ति संयोगः किंच
स्वाभासं चित्तमित्यग्राह्यमेव कस्यचिदिति शब्दार्थः। तद्यथा स्वात्मप्रतिबिंबं आकाशमा
परप्रतिबिंबमेवेत्यर्थः। स्वबुद्धिप्रचारप्रतिसंवेदनात्। सत्त्वानां प्रवृत्तिर्दृश्यते क्रुद्धो
हं भीतोहं अत्र मे रागो अत्र मे क्रोध इत्येतच्च बुद्धेरग्रहणे न युक्तमिति ॥१९॥

एकसमयेचोभयानवधारणं॥नचैकस्मिन्क्षणेस्वरूपावधारणंयुक्तं।क्षणिकवादिनोय-
द्भवनंसैवक्रियातदेवचकारकमित्यभ्युपगमःस्यान्मतिःस्वरसनिरुद्धंचित्तंचित्तान्तरेणगृह्य
तइति॥२०॥चित्तान्तरदृश्येबुद्धिबुद्धेरतिप्रसंगःस्मृतिसंकरश्च॥चित्तंचेच्चित्तान्तरेण
गृह्येतबुद्धिबुद्धिःकेनगृह्यतेसाप्यन्ययासाप्यन्ययेतिअतिप्रसंगः।स्मृतिसंकरश्च।यावं
तोबुद्धिबुद्धीनामनुभवास्तावंत्यःस्मृतयःप्राप्नुवंति।तत्संकराच्चैकस्मृत्यनवधारणंचस्या-
दित्येवंबुद्धिप्रतिसंवेदिनंपुरुषमपलपद्भिर्वैनाशिकैःसर्वमेवाकुलीकृतं।तेतुभोक्तृस्व
रूपंयत्रक्वचनकल्पयंतोअन्यायेनसंगच्छंते।केचित्सत्वमात्रमपिपरिकल्प्यास्तिससत्वो
यएतांम्चस्कंधान्निःक्षिप्यान्यांश्चप्रतिसंदधातीत्युक्त्वाततस्तएवपुनस्त्रस्यंति।तथास्कंधा
नामहंनिर्वेदायविरागायानुत्पादायप्रशांतयेगुरोरंतिकेब्रह्मचर्यंचरिष्यामीत्युक्त्वास
त्वस्यपुनःसत्वमेवापह्नुवतेसांख्ययोगादयस्तुप्रवादाःस्वशब्देनपुरुषमेवस्वामिनंचित्त
स्यभोक्तारमुपनयंतीति॥२१॥चितेरप्रतिसंक्रमायास्तदाकारापत्तौस्वबुद्धिसंवेदनं॥
अपरिणामिनीहिभोक्तृशक्तिरप्रतिसंक्रमाचपरिणामिन्यर्थेप्रतिसंक्रान्तेवतद्वृत्ति
मनुपतति॥=॥=॥=॥=॥=॥=॥=॥=॥=।=॥=॥=॥=॥=॥=॥=॥=॥=॥

तस्याः प्राप्तचैतन्योपग्रहस्वरूपाया बुद्धिवृत्तेरनुकारमात्रतया बुद्धिवृत्त्यविशिष्टा हि
ज्ञानवृत्तिराख्यायते। तथा चोक्तम्। न पातालं न च विवरं गिरीणां नैवान्धकारं कुक्षयो
नोदधीनां गुहा यस्यां निहितं ब्रह्म शाश्वतं बुद्धिवृत्तिमविशिष्टां कवयो वेदयन्त इति।
अतश्चैतदभ्युपगम्यते॥२२॥ द्रष्टृदृश्योपरक्तं चित्तं सर्वार्थम्॥ मनो हि मन्तव्येनार्थेनोपर
क्तं तत्स्वयं च विषयत्वाद्विषयिणा पुरुषेणात्मीयया वृत्त्याभिसंबद्धं तदेतच्चित्तमेव द्रष्टृ
दृश्योपरक्तं विषयविषयिनिर्भासं चेतनाचेतनस्वरूपापन्नं विषयात्मकमप्यविषयात्मक
मिवाचेतनं चेतनमिव स्फटिकमणिकल्पं सर्वार्थमित्युच्यते॥ तदनेन चित्तसारूप्येण
भ्रान्ताः केचित्तदेव चेतनमित्याहुः अपरे चित्तमात्रमेवेदं सर्वं नास्ति खल्वयं गवा
दिर्घटादिश्च सकारणो लोक इति अनुकम्पनीयास्ते कस्मात्। अस्ति हि तेषां भ्रान्तिबी
जं सर्वरूपाकारनिर्भासं चित्तमिति समाधिप्रज्ञायां प्रज्ञेयोऽर्थः प्रतिबिम्बीभूतस्तस्या
लम्बनीभूतत्वादन्यः। स चेदर्थश्चित्तमात्रं स्यात् कथं प्रज्ञयैव प्रज्ञारूपमवधार्येत। तस्मात्प्र
तिबिम्बीभूतोऽर्थः प्रज्ञायां येनावधार्यते स पुरुष इति। एवं ग्रहीतृग्रहणग्राह्यस्व

रूपचितभेदात्। त्रयमथ तज्ज्ञातीतिः प्रविभक्तयंते सम्यग्दर्शिनः तैरधिगतः पुरुषः॥ कुतः॥
तदसंख्येयावासनाभिश्चित्तमपिपरार्थं संहत्यकारित्वात्॥ तदेतच्चित्तमसंख्येयाभिर्वा
सनाभिरेव चित्रीकृतमपिपरार्थं। परस्यभोगापवर्गार्थं नस्वार्थं। संहत्यकारित्वात् गृहवत्
संहत्यकारिणा चित्तेन नस्वार्थेन भवितव्यं। नसुखचित्तंसुखार्थं। नज्ञानंज्ञानार्थम्। उभ
यमप्येतत्परमार्थं। तच्चभोगेनापवर्गेनचार्थेनार्थवान्पुरुषः। सएवपरोनपरः सामान्य
मात्रं। यत्तुकिञ्चित्परं सामान्यमात्रं स्वरूपेणोदाहरेद्वैनाशिकः॥ तत्संहत्यकारित्वात्
परार्थमेवस्यात् यस्त्वसौपरो विशेषसन् संहत्यकारीपुरुषः इति॥ २४॥ विशेषदर्शिनआत्म
भावनिवृत्तिः॥ यथाप्रावृषितृणाङ्कुरस्योद्भेदेनतद्बीजसत्तानुमीयते तथामोक्षमार्गश्र
वणेन यस्यरोमहर्षाश्रुपातौ दृश्येते तत्राप्यस्ति विशेषदर्शनबीजम्॥ अपवर्गभागीयंकर्मा
भिर्निर्वर्तितमित्यनुमीयते। तस्यात्मभावना स्वाभाविकी प्रवर्तते। यस्याभावादिदमुक्तम्॥
स्वभावंमुक्त्वादोषाद्येषांपूर्वपक्षेरुचिर्भवति। अरुचिश्चनिर्णयेभवति। तत्रात्मभावभावना।
कोहमासं कथमहमासं किंस्विदिदं कथंस्विदिदं केभविष्यामः। कथंभविष्यामइति।

पा.तं.

६३ सातुविशेषदर्शिनोऽनिवर्त्तते। कुतः। चित्तस्यैवैष विचित्रः परिणामः। पुरुषस्त्वसत्यामविद्यायां
शुद्धश्चित्तधर्मैरपरामृष्टइति॥ ततोऽस्यात्मभावभावनाकुशलस्य निवर्त्तत इति॥ तदावि
विष वेकनिम्नं कैवल्यप्राग्भारं चित्तम्॥ तदानीं यदस्य चित्तं प्राग्भारमज्ञाननिम्नमासीत्। तदस्या
न्यथाभवति कैवल्यप्राग्भारं विवेकजज्ञाननिम्नमिति तच्छिद्रेषु प्रत्ययान्तराणि संस्का
63 रेभ्यः। विवेकप्रत्ययनिम्नस्य सत्वपुरुषान्यताख्यातिमात्रप्रवाहिणश्चित्तस्य तच्छि
द्रेषु प्रत्ययान्तराणि। अस्मीति वा ममेति वा जानातीति वा जानामीति वा। न जानामीति वा।
कुतः। क्षीयमाणबीजेभ्यः पूर्वसंस्कारेभ्य इति॥ हानमेषां क्लेशवदुक्तम्॥ यथा क्लेशा दग्ध
बीजभावा नप्ररोहसमर्था भवन्ति। तथा ज्ञानाग्निना दग्धबीजभावः पूर्वसंस्कारो न प्रत्यय
प्रसूर्भवति। ज्ञानसंस्कारास्तु चित्ताधिकारसमाप्तिमनुशेरत इति। न चिन्त्यन्ते॥ २८॥ प्रसं
ख्यानेऽप्यकुसीदस्य सर्वथा विवेकख्यातेर्धर्ममेघः समाधिः॥ यदायं ब्राह्मणः प्रसंख्यानेऽप्यकुसी
दस्ततोऽपि न किंचित्प्रार्थयते। यत्रापि विरक्तस्य सर्वथा विवेकख्यातिरेव भवति। संस्कारबी
जक्षयान्नास्य प्रत्ययान्तराणि उत्पद्यन्ते। तदास्य धर्ममेघो नाम समाधिर्भवति॥ २९
ततः क्लेशकर्मनिवृत्तिः॥ तल्लाभादविद्यादयः क्लेशाः समूलकाषं कषिता भवन्ति। कुश

लाकुशलाश्च कर्माशयाः समूलघातं हता भवंति क्लेशकर्मनिवृत्तौ जीवन्नेव विद्वान्वि
मुक्तो भवति। कस्मात् यस्मात् विपर्ययो भवस्य कारणं। नहि क्षीणविपर्ययः कश्चित् के
नचित् क्वचित् जातो दृश्यत इति ॥३०॥ तदा सर्वावरणमलापेतस्य ज्ञानस्यानन्त्यात्
ज्ञेयमल्पं ॥ सर्वैः क्लेशकर्मावरणैर्विमुक्तस्य ज्ञानस्यानन्त्यं भवति ॥ तमसाभिभू
तमनंतं ज्ञानसत्त्वं क्वचिदेव रजसा प्रवर्तितमुद्घाटितं ग्रहणसमर्थं भवति तत्र यदा स
र्वैरावरणमलैरपगतं भवति तदा भवत्यस्यानंत्यं ज्ञानस्यानंत्यात् ज्ञेयमल्पं संपद्यते
यथाकाशे खद्योतः। यत्रेदमुक्तम् ॥ अन्धो मणिमविध्यत् तमनङ्गुलिरावयत् ॥ अग्रीवस्तं
प्रत्यमुञ्चत् तमजिह्वोभ्यपूजयदिति ॥ ततः कृतार्थानां परिणामक्रमसमाप्तिर्गुणानाम्
तस्य धर्ममेघस्योदयात् कृतार्थानां गुणानां परिणामक्रमः परिसमाप्यते नहि कृतभोगा
पवर्गाः परिसमाप्तक्रमाः क्षणमप्यवस्थातुमुत्सहंते ॥ अथ कोऽयं क्रमो नाम ।३२।
क्षणप्रतियोगी परिणामापरान्तनिर्ग्राह्यः क्रमः। क्षणानंतर्यात्मा परिणामस्यापरा
न्तेनावसानेन गृह्यते क्रमः ॥ नह्यननुभूतक्रमक्षणा पुराणता वस्त्रस्यान्ते भवति ॥

पातं

६४

64

तत्रं

नित्येषु क्रमो दृष्टः। द्वयी चेयं नित्यता। कूटस्थनित्यता परिणामि नित्यता च। तत्र कूट
स्थ नित्यता पुरुषस्य परिणामि नित्यता गुणानाम्॥ यस्मिन्परिणम्यमाने तत्वं न वि
हन्यते तन्नित्यं उभयस्य च तत्वानभिघातान्नित्यत्वं। गुणधर्मेषु परिणामापरान्तनि[illegible]
ग्राह्यः क्रमो लब्धपर्यवसानः॥ नित्येषु धर्मिषु गुणेषु अलब्धपर्यवसानः। कूटस्थनि
त्येषु स्वरूपमात्रप्रतिष्ठेषु मुक्तपुरुषेषु स्वरूपास्तिता क्रमेणैवानुभूयत इति॥ तत्राप्य
लब्धपर्यवसानः शब्दपृष्ठेनास्ति क्रियामुपादाय कल्पित इति॥ अथास्य संसारस्य स्थि
त्या गत्या च गुणेषु वर्तमानस्यास्ति क्रमसमाप्तिर्न वेति॥ अवचनीयमेतत्॥ कथ
मस्ति प्रश्न एकान्तवचनीयः॥ सर्वो जातो मरिष्यतीम्रत्वा जनिष्यत ॐ भो इति॥ अथ
सर्वो जातो मरिष्यतीति म्रत्वा च जनिष्यतीति मेतत् विभज्य वचनीयमेतत्॥ प्रत्यु
दितख्यातिः। क्षीणतृष्णः कुशलो न जनिष्यत इतरस्तु जनिष्यते॥ मनुष्यजातिः श्रेय
सी न वा श्रेयसीति॥ एवं परिपृष्टे विभज्य वचनीयप्रश्नः। पशूनुद्दिश्य श्रेयसी देवानृषीं

A

१०

माधिकृत्यनेति ॥ अयं त्ववचनीयः प्रश्नः ॥ संसारोऽयमंतवानानन्त ॥ इति ॥ कुशलस्
यास्ति संसारक्रमपरिसमाप्तिर्नेतरस्येति ॥ अन्यतरावधारणे दोषः तस्मात् व्याकरणी
यएवायं प्रश्न इति गुणाधिकारक्रमसमाप्तौ कैवल्यमुक्तं तत्स्वरूपमवधार्यते पुरु
षार्थशून्यानां गुणानां प्रतिप्रसवः कैवल्यं स्वरूपप्रतिष्ठा वा चितिशक्तिरिति ॥ पुनर्बु
द्धिसत्वानभिसंबंधात्पुरुषस्य चितिशक्तिरेव कैवल्या ॥ तस्याः सदा तथैवावस्था
नं कैवल्यम् इति ३४ ॥ इति श्री पातञ्जले योगशास्त्रे सांख्यप्रवचने कैवल्यपादश्च
तुर्थः संपूर्णः शुभमस्तु

पालं नं ३२॥ यह पुस्तक ५३८८ इस नम्बर के पत्र को सें लीखवाई याहे

इति

।समाप्तमिदम्पातञ्जलयोगसूत्रम्।

सं.१९६१ ज्येष्ठ शु. तृती.